नं. — ५०४८

आश्वलायन-श्रौत सूत्राणि

× × ×

पत्र. १२६ — सं० १८५२

सूत्र पद्धति परिशिष्टं

5047

1 to 46

1 to 80

F=126

𑆄𑆯𑇀𑆮𑆬𑆳𑆪𑆤𑆯𑇀𑆫𑆿𑆠𑆱𑆷𑆠𑇀𑆫 𑆥𑆷𑆫𑇀𑆮𑆾𑆠𑇀𑆠𑆫𑆰𑆛𑇀𑆑𑆩𑇀

𑇕𑇐𑇔𑇗

𑇒

॥ अथश्रौतसूत्रउत्तरषट्कप्रारंभः ॥

श्रौ
६००

सू॰ उ॰ १

१

श्रीगणेशायनमः॥ ॥हरिः ॐ३॥ ॥सत्राणामुक्तादीक्षोपसदं एते नाह्नासुत्यानि प्रातरनुवाकाद्युदवसा
नीयांतान्यंत्यानि पत्नीसंयाजांतानीतराणींद्रस्प्राशनसरव्यविसर्जनेत्वंत्य एवं ध्रुवाः शस्त्राणा
मातानाः सूक्तान्येवसूक्तस्थानेष्वहीनेषु दैवतेन व्यवस्थास्तृचाः प्रउगे सर्वाहर्गणेषु तायमानरू
पाणां प्रथमादह्नः प्रवर्त्तेते ऽभ्यासातिप्रैषौ वह्न उत्तमे शस्त्रे परिधानीयायां उत्तमे वचने उत्तमं
चतुरक्षरं द्विरुक्त्वा प्रणुयाद्धूतीयादिषु त्यमूषु वाजिनं देवजूतमिति तार्क्ष्यमग्रे निष्केवल्यसूक्ता
नां जातवेदसे सुनवाम सोममित्याग्निमारुते जातवेदस्यानां मारंभणीयाः पर्यासान्कद्धतोह
रहः शास्यानीति होत्रकाद्धूतीयादिष्वेवतानि सर्वाणि सर्वत्रान्यत्राह्न उत्तमाद्वैकल्पिकान्यग्नि
ष्टोमे हर्गणमध्यगते ऽग्निष्टोमायनेषु वा ऽन्यान्यभ्यासातिप्रैषाभ्यामिति कौत्सो विकृतौ तद्गुण
भावान्नित्यानि होतुरिति गौतमः संघातादावनुप्रवृत्तत्वादच्युतशब्दत्वाच्च होत्रकाणामपि गाण
गारिर्नित्यत्वात्सत्रधर्मान्वयस्य प्रगाथत्तच सूक्तागमे षैकाहिकं तावदुद्धरेत्॥ १॥ चतुर्विंशे होताज
निष्टे त्याज्यमानो मित्रावरुणो मित्रं वयं हवामहे मित्रं ऊवे पूतदक्षमयं वां मित्रावरुणा पुरूरुणा चिद्ध

१

स्त्रैंप्रति वां सूर उदित इति षळहः स्तोत्रिया मैत्रावरुणस्या याहि सुषुमा हि त इंद्र मिद्गाथिनो बृहदिंद्रे
णसंहित दक्षसं आ दह स्वधामन्वित्येकाह्ने चेंद्रो दधीचो अस्थभिरित्ति ष्ठन्नोजसा सह भिंधि विश्वा अपद्वि
ष इति ब्राह्मणाच्छंसिन इंद्राग्नी आगतं सुतमिंद्राग्नान मो बृहत्ताउ वेययोरिदमियं वामस्य मन्मन इं
द्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्विजेत्यच्छावाकस्य तेषां यस्मिन्त्स्तुवीरन्त्स स्तोत्रियो यस्मिन्छूः सो
नुरूप एकस्तोत्रियेष्वहःसु योन्यो नंतरः सो नुरूपो न चेत्सर्वो हि र्गणः षळहो वैकाहिकस्तथा सत्यस्येचो
र्ध्वमनुरूपेभ्य ऋजुनीती नो वरुण इंद्र वो विश्वतस्परि यत्सोम आ सुते नर इत्यारंभणीयाः त्रास्त्वा
स्थानेत्वान्यपरिशिष्टानावपेरंश्चतुर्विंशमहाव्रताभिजिद्विश्वजिद्विषुवत्सु सर्वस्तोम सर्वपृष्ठेषु चोर्ध्व
मावापात्प्रति वां सूर उदिते व्यंतरिक्षमतिरच्छया वा अश्वस्य सुन्वत इति तृचाः पर्यासाः सत्वेवमैत्रावरु
णस्य षळहः स्तोत्रिय उत्तमः स पर्यासस्तद्दैवतमन्यं पूर्वस्य स्थाने कुर्वीताऽन्यत्रापि संनिपाते न तच्च
सूक्तं वानंतर्हितमेकासने द्विःशंसेन्महा वाले भिदं चेच्छंसे दूर्ध्वमनुरूपेभ्य आरंभणीयाभ्यो वा नाभा
कांस्तृचानावपेरन्गायत्रीकारं सक्षपः परि षस्वजदिति मैत्रावरुणो यः ककुभो निधारयदिति वा पूर्वश्ट इं

सू.उ.१

२

द्रोपमातय इति ब्राह्मणाच्छंसी ताहिमध्यं भराणामित्यच्छावाकः॥२॥ मरुत्वतीये प्रैतु ब्रह्मणस्पतिरु
त्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्यावावपते एवौ नित्यौ बृहदिंद्राय गायत नकिः सुदासो रथमिति मरुत्व
तीयां ऊर्ध्वं नित्यां कया शुभेति च मरुत्वतीये पुरस्तात्सूक्तस्य शंसेद्देवं स्थितान्यगाथान्यध्याभिप्लव
योरन्वहं पुनः पुनरावर्त्तयेयुरेकैकं ब्राह्मणस्पत्यानामेवं मरुत्वतीयानां ध्रुव इंद्र निहवो धाय्याश्च बृह
त्पृष्ठं रथंतरं वा तयोरक्रियमाणस्य योनिं शंसेद्द्वैरूपवैराजशाक्वररैवतानां चपृष्ठ्यः स्तोत्रियायोन्योर्ध
र्वास्तासां विधानमन्वहं ताभ्य ऊर्ध्वं सामप्रगाथानुक्तो रथंतरस्योभयं शृणवच्चन इति बृहत इंद्र त्रिधातु
शरणं त्वमिंद्र प्रवृत्तिषु मोषु त्वा वाघतश्चनेति सद्विपदे उपसमस्ये द्विपदामिंद्रमिद्देवतातय इतीतरेषां पृ
ष्ठ्य एवैकैकमन्वहं तदिदासेति च पुरस्तात्सूक्तस्य शंसेदुक्थपात्रं च मसांश्चांतराति ग्रात्या न्म क्षयंति
निष्केवल्ये नित्यो भक्षजपः षोळशिपात्रेण भक्षिणः॥३॥ होत्रकाणां कया नश्चित्र आ भुवत्कया त्वं न
ऊत्या माचिदन्यद्विशंसत यच्चिद्धि त्वा जना इम इति स्तोत्रियानुरूपा मैत्रावरुणस्य तं वो दस्ममृतीष
हं तत्त्वा यामि सुवीर्यं मभि प्रवः सुराधसं प्र सु श्रुतं सुराधसं वयं घ त्वा सुतावंतः क ईं वेद सुते सचा विश्वाः

२

एतना अभि भूतरं नरं तमिंद्रं जोहवीमि याइंद्र भुज आभर इत्येका द्वे चेंद्रो मदाय वा वृधे मदे मदे हि नो ददिः
सुरूपकृत्नुमूतये शुष्मिन्तमं न ऊतये आयं तइव सूर्यं वणमहाँ असि सूर्य उदुत्यद्दर्शतं वपुरुदुत्येमधुम
त्तमा स्त्वमिंद्र प्रतूर्त्तिषु त्वमिंद्र यशा असीद्र क्रतुं न आभर इंद्र ज्येष्ठं न आभरा त्वोस हस्रमाशातं ममत्वा सूर
उदित इति ब्राह्मणाच्छंसिन स्तरोभिर्वो विदद्वसुं तरणिरित्सिषासति त्वामिद्यो नरो वयमेनमिदा ह्योया
राजा चर्षणीनां यः सत्राहा विचर्षणिः स्वादोरित्था विषूवत इत्था हि सोम इन्मद उ भयं दिंद्र रोदसी अवयत्त्वं
शतक्रतो न किष्टं कर्मणा नशन्न त्वा बृहंतो अद्रय उ भयेशृणवच्च न आ वृष स्वपुरूवसो कुदाचुनस्तरीरसि
कुदा चन प्रयुच्छसि यत इंद्र भयामहे यथा गोरो अपाकृतं यदिंद्र प्रागपागुदग्यथा गोरो अपाकृतमित्य
च्छावाकस्य स्तोत्रियानुरूपाणां यद्यनुरूपे स्तुवीरन्स्तोत्रियो नुरूपं ऊर्ध्वं स्तोत्रियानुरूपेभ्यः कस्तमिं
द्र त्वावसुं कन्नव्यो अतसीनां कद्रून्न्व स्याकृतमिति कद्रूतः प्रगाथा अपप्राच इंद्र विश्वां अमित्रा न्ब्रह्म
णा ते ब्रह्मयुजा युनज्म्युरुं नो लोकमनुनेषि विद्वानिति कद्रूभ्य आरंभणीया ऊर्ध्वमारंभणीयाभ्यः
सद्यो ह जात इत्यरहः शास्यं मैत्रावरुणो ऽस्माइदु प्रतवसे शासद्वह्निरिति तराव ही नसूक्ते आसत्योयाति

त्यहीन सूक्तं द्वितीयं मैत्रावरुणं उ उ अप्याण्यभितष्टेवेतीतरा वहरहः शस्येन्नूनं सा त इत्येतमुत्तमं महीनसू
क्तानि षळहः स्तोत्रियानाव पतस्तू डुष्य देवः सविता हिरण्ययेति तिस्रस्ते हि द्यावापृथिवी यज्ञस्य वोरथ्यमिति
वैश्वदेवं पृक्षस्य वृष्णो वृष्णे शर्द्धाय यज्ञेनवर्द्धतेत्याग्निमारुतमग्निष्टोम इदमहरुक्थ्यो वा ॥ ४ ॥ अभि
प्लव पृष्ठ्याहानि रथंतर पृष्ठान्ययुजानि बृहत्पृष्ठानीतराणि तृतीयादिषु पृष्ठ्यस्यान्वहं द्वितीयानि वैरूप
वैराजशाक्वररैवतानि तेषां यथास्थाने क्रियायां योनीः शंसेत्सर्वत्रन्वास्वयोनिभावेन्यत्राश्विनाद्यज्ञाय
ज्ञीयस्यत्वक्रियमाणस्यापि सानुरूपां योनिं व्याहावं शंसेदूर्ध्वमितरस्यानुरूपा होत्रकाः परिशिष्टाना
वापानुद्रुत्य मित्रं वयं हवामहे मित्रं हुवे पूतदक्षमयं वां मित्रावरुणा नो मित्रावरुणेति तृचाः प्र वो मित्रा
येति चतुर्णां द्वितीयमुद्धरेत् अभि मित्रयोर्वरुणयोरितिषट् का व्येभिरदाभ्येति तिस्रो मित्रस्य चर्षणीधृत
इति चतस्रो मे च्यो यञ्चि द्वितेविशइतिवारुणमेतस्य तृचमावपेत मैत्रावरुणो नित्यादधिकं स्तोमका
रणात्पंचसप्तदशो नवैकविंशो द्वादशचतुर्विंशौ पंचदशत्रिणवएकविंशतिं त्रयस्त्रिंशौ द्वात्रिंशतं चतुश्च
त्वारिंशौ षट् त्रिंशतमष्टाचत्वारिंशे एकाल्पीयसीर्वैकाहेष्वेकभूयसीर्वा नारंभणीयान्पर्यासां

3

अंत्याऐकाहिकास्तृचाः पर्यासस्थानेषु ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति षट्सूक्ता न्यावापउ
क्तौ मैत्रावरुणेनेहेंद्राग्नी इंद्राग्नी आगतं ताउवेय यो रिदमिति न वेयं वामस्य मन्मन इत्येकादशायत्तस्य
हि स्थ इत्यच्छावाकस्यायात्विंद्रोवस इति मरुत्वतीयमानइंद्र इति निष्केवल्यं प्रथमस्याभिप्लविकस्य
मध्यंदिन इत्युक्तं एते शस्त्रे प्रतीयादहीनसूक्तस्थाने एवा त्वामिंद्र यन्न इंद्रः कथा महामिंद्रः पूर्भिद्य एक
इद्धव्यस्तिग्मशृंग इमाम् षु वि च्छंति त्वां ग्रावासद्द्विरिति संपातां एके कस्यत्र यस्त्रयं उक्तामरुत्वतीयें युंजते
मन इहेह व इति चतस्रो देवानुवद इति वैश्वदेवं ॥५॥ द्वितीयस्य चतुर्विंशो नाज्यं वायो ये ते सहस्रिण इति
द्वैतीयाः सोमासः आग हीत्येको भादेवा दिविस्पृशो ति द्वे शुक्रस्याद्यगवाशिर इत्येकोऽयं वां मित्रावरुणे
ति पंच तृचा गात् सं मदं प्रउगमित्येतदा चक्षते विश्वानरस्य वस्पतिमिंद्र इत्सोमपा एक इति मरुत्वतीयस्य प्र
तिपदनुचरौ विंद्र सोमं यात ऊतिरवमेति मध्यंदिनो निष्केवल्यस्योत्तमे विपरीते भारद्वाजो होता चेत्प्रकृत्या चा
तुर्विंशिकं तृतीयसवनं विश्वोदेवस्य नेतुरित्येकां तत्सवितुर्वरेण्यमिति द्वे आ विश्वदेवं सत्पतिमिति तु वैश्वदेव
स्य प्रतिपदनुचरौ वाज्यप्रउगे प्रतिपदनुचराश्वोभयोर्युग्मेष्वेवमभिप्लवे ॥६॥ तृतीयस्य त्र्यर्यमायोजात

स्॰उ॰१

४

एवेतिमध्यंदिनस्तद्देवस्यघृतेनद्यावापृथिवीइतितिस्रोनश्वोजातःपरावतोयइतिवैश्वदेवंवैश्वानरायधि
षणांधारावरामरुतस्त्वमग्नेप्रथमोअंगिराइत्याग्निमारुतंचतुर्थस्योग्रोजज्ञइतिनिष्केवल्यंकयाम्य
ग्निमस्यमेद्यावापृथिवीइतितिस्रस्ततंमेअपइतिवैश्वदेवंवैश्वानरंमनसेतितिस्रःप्रयेशुंभंतेजन
स्यगोपाइत्याग्निमारुतंपंचमस्यकयाशुभीयस्तिग्मशृंगइतिमध्यंदिनःकयाशुभीयस्यतुनवम्यु
त्तमाऽन्यत्रापियत्रनिविद्धानंस्याद्धूतवतीभुवनानामभिश्रियेंद्रऋभुभिर्वाजवद्भिरितितत्रचोकउ
प्रियायेतिवैश्वदेवंपृक्षस्यवृष्णोवृष्णेऽर्द्रायिनश्चित्सहोजाइत्याग्निमारुतंषष्ठस्यसावित्राभर्वेंत
तीयेनवैश्वानरीयंचकतरापूर्वाषासानक्तेतिवैश्वदेवंप्रयज्यवइमंस्तोममित्याग्निमारुतमित्य
भिप्लवःषळहस्तस्याग्निष्टोमावभितउक्थ्यामध्यउक्थ्येषुस्तोत्रियानुरूपामैत्रावरुणस्य॥७॥
एत्यूषुब्रवाणितअग्निरगामिभारतःप्रवोवाजाअभिद्यवोभिप्रयांसिवाहसाप्रमंहिष्ठायगायत
प्रसोअग्नेतवोतिभिरग्निंवोवृधंतमग्नेयंयज्ञमध्वरंयजिष्ठंत्वाववृमहेयःसमिधायआउत्या
तेअग्नइध्मीमत्युभेसुश्चंद्रसर्पिषइतिद्वेएकाचोग्निंतंमन्येयोवसुरातेवत्सोमनोयमदाग्नेस्थूरंर

४

यिंभर प्रेष्ठं वो अतिथिं श्रेष्ठं यविष्ठ भारत मह्यो नो अग्निराऊतो यदी घृतेभिराऊत आघाये अग्निमिं
धते इमा अभिप्रणोनुम इत्यथ ब्राह्मणाच्छंसिनोऽभ्रात व्यो अना त्वं माते अमाजुरो यथैवा ह्यसि
वीरयुरेवा ह्यस्य सूनृता तं ते मदं गृणीमसि तम्वभिप्रगायत वयमु त्वामपूर्व्य योन इदमिदं पुरेंद्रा
य सामं गायत सखाय आशिषामहि य एक इद्विदयते य इंद्र सोमपातम एंद्र नो गधि उ मध्वो म दिन्तर
मे तो न्विंद्रं स्तवाम सखायः स्तुहींद्रं व्यश्वव त्वं न इंद्राभर वयमु त्वामपूर्व्य योन इदमिदं पुरा याहीमइं
द्र वइति समाहार्योनुरूपोऽभ्रात व्यो अना त्वं माते अमाजुरो यथेत्यथाच्छावाकस्येंद्रं विश्वा अवीवृ
धन्नुक्थमिंद्राय ग्रां स्यं श्रुधी हवं तिरश्च्या आ श्रुत्कर्ण श्रुधी हवमसावि सोम इंद्र त इममिंद्र सुतं पिब य
दिंद्र चित्र मेहना यस्ते साधिष्ठोवसे पुरांभिं दुर्युवा कुविट्टेषा ह्यसि राधसे गायंति त्वा गायत्रिण आ त्वा गिरो
रथीरिवेति सूक्तानामेकैकं त्रिः शस्त्वा वपेरन् ॥ ८ ॥ स्तोमे वर्द्धमान इमा उ वां भृमयो मन्यमाना इति तिस्र इंद्रा
को वामिति सूक्ते श्रुष्टीवां यज्ञो युवां नरा पुनीषे वामिमानि वां भागधेयानी त्येतस्य यथार्थं मैत्रावरुणी
यस्तस्तंभ यो अद्रिभिद्यज्ञे दिव इति सूक्ते अस्तेव सुप्रतरमायात्विंद्रः स्वपतिरिमां धियमिति ब्राह्मणा

सू० उ० १

५

छंसी विष्णोर्नुकमिति सूक्ते परोमात्रयेत्यच्छावाकः॥ ९॥ द्व्यस्याभिप्लवे नोक्ते अहनी आद्ये आ
द्याभ्यां तृतीयसवनानि चान्वहमुपप्रयंत इति तु प्रथमेहन्याज्यमग्निं दूतमिति द्वितीये तृतीये
युक्ष्वाहीत्याज्यं वायवायाहि वीतय इत्येको वायो याहि शिवा दिव इति द्वे इंद्रश्च वायवेषां सुतानामि
ति द्वयोरन्यतरां द्विरा मित्रे वरुणे वयमश्विना वेह गच्छतमायात्यद्रिभिः सुतं सजूर्विश्वेभिर्देवेभिरु
त नः प्रिया प्रियास्वित्यो ह्लिहं प्रउगमुक्तमेन्द्रं चमभ्यासोऽश्च तुरक्षरानवो तृतीयेनाभिप्लविके
नोक्तो मध्यंदिनस्तं तमिद्राध से महे त्रय इंद्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ वैरूपं चेत्य
ध्यंय द्यावइंद्रते शतं यदिंद्र यावतस्त्वमिति प्रगाथो स्तोत्रियानुरूपौ॥ १०॥ चतुर्थेहनि प्रातरनुवाक
प्रतिपद्यर्द्धर्चा द्यो न्यूंखो द्वितीयं स्वरमोकारं त्रिमात्रमुदात्तं त्रिस्तस्य तस्य चोपरिष्टादपरिमितान्यं
च वार्धौकारानन्नुदात्तानुत्तमस्य तु त्रीन्पूर्वमक्षरं निहन्यते न्यूंखमाने तदपि निदर्शनायोदाहरि
ष्यामः॥ आपो ३ उ उ उ उ उ ओ ३ उ उ उ उ उ ओ ३ उ उ उ रेवतीः क्षयथा हि वस्वः क्र
तुं च भद्रं बिभृथामृतं च॥ रायो ३ उ उ उ उ उ ओ ३ उ उ उ उ उ ओ ३ उ उ उ श्च

५

स्त्र च पत्यस्य पत्नीः सरस्वती तद्वृणते वयोधो ३ मापो ३ आग्निंनस्ववृक्तिभिरित्याज्यं तस्योत्तमावर्जं
त्ततीयेषु पादेषु न्यूंखो निनर्दश्चोक्तो न्यूंखः स्वरादिरं त ओकारश्चतुर्निनर्द उदात्तौ प्रथमो त्तमौ वनु
दात्ताावितरौ उत्तरो नुदात्ततरः प्लुतः प्रथमो मकारांत उत्तमस्तद्पि निदर्शनायोदाहरिष्यामः॥ आग्निं
नस्ववृक्तिभिः॥ होतारं त्वा वृणीमहे॥ यज्ञो ३ ऊ ऊ ऊ ऊ ऊ ओ ३ ऊ ऊ ऊ ऊ ऊ ओ ३ ऊ ऊ ऊ
यस्तीर्णबर्हिषे विवो मदो ३ ऊ ३ ऊ ३ ऊ ३ मूत्री रंपावकशो चिषंविवक्षसो ३ माग्निंनस्ववृक्तिभिः॥
होतारं त्वा वृणीमहे॥ ओ ३ ऊ ऊ ऊ ऊ [illegible] ओ ३ ऊ ऊ ऊ ऊ ऊ ओ ३ ऊ ऊ ऊ मदेथमदेवो ३ ऊ ३
ऊ ३ ऊ ३ मोथामोदेवो मित्यस्य प्रतिगरोऽपिवोदात्तादनुदात्तं स्वरितमुदात्तमिति चतुर्निनर्दस्तद्पि
निदर्शनायोदाहरिष्यामः॥ आग्निंनस्ववृक्तिभिः॥ होतारं त्वा वृणीमहे॥ यज्ञो ३ ऊ ऊ ऊ ऊ ऊ
ओ ३ ऊ ऊ ऊ ऊ ऊ ओ ३ ऊ ऊ ऊ यस्तीर्णबर्हिषे विवो मदो ३ ऊ ३ ऊ ३ ऊ ३ मूत्री रंपावकशो
चिषंविवक्षसो ३ माग्निंनस्ववृक्तिभिः॥ होतारं त्वा वृणीमहे॥ ओ ३ ऊ ऊ ऊ ऊ ऊ ओ ३ ऊ
ऊ ऊ ऊ ऊ ओ ३ ऊ ऊ ऊ मदेथमदेवो ३ ऊ ३ ऊ ३ ऊ ३ मोथामोदेवो मित्यस्य प्रतिगरः

ऋ॰उ॰१

६

प्रथमाद्धौंकारादध्वर्युर्न्यूंखयेद्द्वितीयाद्यास्तुपरमं हैके यथावासंपादयिष्यंतोमन्येरन्वायो

शुक्रो अयामितेविहिहो आ अवीतावायोयातंहरीणामिंद्रश्चवायवेषां सोमानामाचिकितानसु

कतूआनोविश्वाभिरूतिभिस्त्यमुवो अप्रहणमपत्यं हृजिनंरिपुमंबितमेनदीतमद्त्यानुष्टुभं

प्रउगमेकपातिन्यः प्रथमस्त्तंत्वाय ज्ञेभिरीमहद्द्वसोसुतमंधइतिमरुत्वतीयस्यप्रतिपदनुच

रोश्रुधीहवमिंद्रमरुत्वाँ इंद्रेतिमरुत्वतीयमंत्येनिविदंदध्यादनेकभावेसूक्तानांवैराजंचेत्पृष्ठंपि

बासोममिंद्रमंदतुत्वेतिस्तोत्रियानुरूपौकुहश्रुतइंद्रोयुध्मस्यतइतिनिष्केवल्यंश्रुधीहवीयस्य

तुत्तचआद्येर्ऋचादिषुन्यूंखएवंकुहश्रुतीयस्यविराजांमध्यमेषुपादेषुनित्यइहप्रतिगरोन्यूंखादिः

प्रणवांतः प्रणवेकुहश्रुतीयानामर्ऋचेयाश्वेन उत्तमावर्जंनतेगिरोअपिमृष्येतुरस्यप्रवोमहेम

हिवृधेभरध्वमितिचतस्त्रस्तिस्त्रश्चविराजस्तासामूर्ध्वमारंभणीयाभ्यस्तचानावपेरन्नाद्यं

मैत्रावरुणस्तस्योत्तमादिशस्तानां तचं ब्राह्मणाच्छंसीतस्यचाच्छावाकोयजामहइंद्रंवज्र

दक्षिणमितिद्वितीयानेवमेवपंचमेहनियच्छिद्धिसत्यसोमपाइत्येकेकमेवमेवषष्ठेहनींद्रा

६

यहि द्योरसुरो अनम्नतेत्येवमेव॥११॥ स्तोमे वर्द्धमाने को अद्य नर्योंव नेनवायंआयाह्यर्वाङि त्य
ष्टर्चां न्यावपेरन्नुपरिष्टात्पारुच्छेपीनां तैरप्यनतिशास्तं ऐंद्राणि त्रे ष्टुभान्यमरुच्छब्दान्याव
पेरन्नेत्वेतान्यनोप्यातिशंसनमेकया द्वाभ्यां वा प्रातः सवनेऽपरिमिताभिरुत्तरयोः सवनयोः
पंचमस्येममू षु वो अतिथिमुषर्बुधमिति नवाज्यमानोयद्वां दिविस्पृशमिति द्वे आनो वायो म
हे तन इत्येका रथेन पृथुपाजसा बृहद्वः सूरचक्षस इमा उ वां दिविष्टयः पिबा सुतस्य रसिनो देवंदे
वं वो वसे देवं देवं बृहदुगायिषे वच इति बार्हतं प्रउगं प्रगाथानेके द्वितीयोत्तमवर्जं यत्तांच ज
न्यया विशोंइइत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ ववितासीत्थाहीइपिबतुभ्य
मिति मरुत्वतीयं शाक्करं चेत्पृष्ठं महानाम्न्यस्तोत्रियस्ता अध्यर्धकारं नवग्रहत्याति स्तोभवं
तिताभिः पुरीषपदान्युपसंतनुयात्वंचाक्षरशः पूर्वाणि पंचसर्वाणि वा यथानिशांतं योनिस्था
नेतु यथानिशांतं स पुरीषपदा उत्तमेन संतानः स्वादोरित्था विषूवत उपनोहरिभिः सुतमिंद्रवि
श्वा अवीवृधन्निति त्रयस्तृचा अनुरूपः प्रेदं ब्रह्मे द्रोमदायं सत्रामदासइतिनिष्केवल्यं पांक्ते पूर्वे स्य

क्रेमरुत्वतीये पांक्ते निष्केवल्ये आद्येतु त्रिष्टुबुत्तमैतयोरवसाने शातक्रतो सम स्युजिदितिम
रुत्वतीये शाचीपते नेद्येति निष्केवल्ये निष्केवल्ये॥ १२॥ ॥ इति श्रौतसूत्रे उत्तरषट्के प्रथमोऽ
ध्यायः॥ ॥ हरिः ॐ ३॥ ॥ षष्ठस्य प्रातः सवने प्रस्थितयाज्यानां पुरस्तादन्याः कृत्वोभाभ्या
मनवानं तोयजंति वृषन्निंद्र वृषपाणास इंदवः सुषुमायातम द्रिभिर्वनोतिहि सुन्वन्क्षयं
परीणसो मोषुवो अस्मदभिता नि पौंस्यो षूणो अग्ने शृणुहि त्वमीळितो ग्निं होतारं मन्ये दा
स्वंतं दध्यङ् ह मेजनुषं पूर्वो अंगिरा इत्येवमेवमाध्यंदिने ऽध्यर्द्धं तु तत्रानवानं पिबा सोम
मिंद्र सुवानमद्रिभिरिंद्राय हि द्यौरसुरो अनम्नतेति षट्कुपरिष्टात्त्वं च क्रतुयाजानां प्रैषम
ते सोयजनं चं चानवानमुत्तरक ऋगं तेरसोयजेति प्रेष्य देवमेवयजंति तुभ्यं हिन्वानो वसिष्टगा अपद्
ति द्वादशायं जायत मनुषो धरीमणी त्याज्यमेके नद्वाभ्यां च विग्रह स्त्रिभिरवसानं चतुर्भिः प्रण
वोयत्रा ईर्चन्नाः पारुच्छेप्य स्तीर्णं बर्हि रिति तच्चौ सुषुमायात मद्रिभिर्युवां स्तोमेभिर्देवयंतो अश्वि
नावर्म ह इंद्र वृषन्निंद्रा स्तु श्रोषक्रोषूणो अग्ने शृणुहि त्वमीळितो ये देवासो दिव्येकादश स्थेयम

द्दाद्भसम्रणच्युतमितिप्रउगंद्वेचैकाचपंचमंएकपातिन्यउपोत्तमंउत्तमेन्वृचमभ्यासांअ
ष्टाक्षरानवांसपूर्व्योमहानांत्रयइंद्रस्यसोमाइतिमरुत्वतीयस्यप्रतिपदनुचरौयंत्वंरथमिंद्रस
यो वृषेंद्रमरुत्वइतितिस्रइतिमरुत्वतीयमेकेनाग्रेवसायद्वाभ्यांप्रणुयाद्वाभ्यामवसा
यद्वाभ्यांप्रणुयाद्यत्रपच्छःपारुच्छेप्योरैवतंचेत्स्यरैवतीनःसधमादेरेवांइद्वेवतः
स्तोतेतिस्तोत्रियानुरूपांवेंद्रयात्युपनःप्रघान्चस्याभ्रूरेकइतिनिष्केवल्यमभित्यंदेवं
सवितारमोण्योरित्येकातत्सवितुर्वरेण्यमितिद्वेदोषोआगाद्बृहद्गायद्युमद्धेत्याथ
र्वण॥स्तुहिदेवंसवितारं॥तमुष्टुह्यंतःसिंधुंसूनुंसत्यस्ययुवानं॥अद्रोघवाचंसुशेवं॥
सघानोदेवःसवितासाविषद्वसुपतिः॥उभेसुक्षितीसुधातुरितिवैश्वदेवस्यप्रतिपदनु
चरौउद्वत्यचोत्तमंसूक्तंत्रीणीदमित्थारौद्रमितिप्राग्रुपोत्तमायांयेयज्ञेनेत्यावपते

तस्यार्द्धर्चशः प्रागुत्तमायां ऊर्ध्वं चतुर्थ्याः शिष्टेशस्त्वा स्वस्ति नो मिमीतामश्विना भग इतित्
च इति वैश्वदेवं॥ १॥ होत्रकाणां द्विपदास्विहोक्थ्येषु स्तुवते तऊर्ध्वमनुरूपेभ्यो विहृतानि
शिल्पानि त्रींसेयु मैत्रावरुणस्याग्ने त्वं नो अंतमोग्ने भव सुषमिधा समिद्ध इति स्तो
त्रियानुरूपौ वथवालखिल्या विहरेत्तदुक्तं षोडशिना सूक्तानां प्रथमद्वितीये पच्छ
स्तृतीय चतुर्थे अर्द्धर्चशः क्रूशः पंचमषष्ठे व्यतिमर्शं वा विहरेत्पूर्वस्य प्रथमामुत्त
रस्य द्वितीययोत्तरस्य प्रथमां पूर्वस्य द्वितीयया तयोर्नाननर्चौ प्रथमद्वितीयाभ्यां पादाभ्या
मवस्येत्प्रथमद्वितीयाभ्यां प्रणुयात्तृतीयोत्तमाभ्यामवस्येत्तृतीयोत्तमाभ्यां प्रणुया
देवं व्यतिमर्शमर्द्धर्चश उत्तरे एवं व्यतिमर्शमृक्शउत्तरे विपरिहरेद्देवोत्तमे सूक्ते गाय
त्रे सर्वत्रेमानि वां भागधेयानीति प्रागुत्तमाया आह्वयद्रोहणं रोहेद्धंसः शुचिषदिति प

च्छोऽर्द्धर्चशस्त्रिपद्या चतुर्थमनवानमुक्त्वा प्रणुत्यावस्येत्पुनस्त्रिपद्यार्द्धर्चशः पच्छ
एव सात्यमेतद्दूरोहणमावां राजानाविति नित्यमैकाहिकमिति नु हौंऽहीनावथ महावालखि
देतान्येव षट्सूक्तानि व्यतिमर्शं पच्छो विहरेद्व्यतिमर्शमर्द्धर्चशो व्यतिमर्शमृक्छः प्र
गाथां तेषु चानुपसंतानमृग्गावानमेकपदाः शंसेदिन्द्रो विश्वस्य गोपतिरिन्द्रो विश्वस्य भू
पतिरिन्द्रो विश्वस्य चेततीन्द्रो विश्वस्य राजतीति चतस्र एकां महाव्रता दाहरेत्त्रयो विंशति
मष्टाक्षरान्पादान्महानाम्नीभ्यः सपुरीषाभ्यः षोडशिनोक्तः प्रतिगरोऽन्यत्रैकप
दाभ्यो वहृष्ब्येकपदा अविहरंश्चतुर्थं शंसेत्समानमन्यत्॥२॥ ब्राह्मणाच्छंसिनं इमा
नु कं भुवना सीषधामेति पंचाऽयावाजं देवहितं सनेमेति स्तोत्रियानुरूपाववपप्राच्च
इन्द्रेति सुकीर्तिं स्याऽर्द्धर्चशश्चतुर्थमथ वृषाकपिं शंसेद्यथा होताऽज्याद्यां चतुर्थं पं

सू.उ.२
१

क्तिः शंसं त्विहा प्रणवांतश्च प्रतिगरो द्वितीये पांक्तावसाने तस्मादूर्ध्वं कुंतापं तु स्यादितश्चतु
र्दशाविग्राहं निनर्द्दशंसेत्तृतीये ब्रुपादेषूदात्तमनुदात्तपरं यत्स्वथमंतं निनर्देत्तदपि निर्दशो ना
यो दाहरिष्यामः॥ इदं जना उपश्रुत॥ नराशंस स्तविष्यते॥ षष्टिं सहस्रा नवतिं च कौरम आरु
शमेषु दद्महो३मो थामो दैवो मित्यस्य प्रतिगरश्चतुर्दशयामेकेनद्वाभ्यां च विग्रहः शेषोर्द्धर्च
शः एता अश्वा आप्लवंत इति सप्त प्रतिपदान्यष्टादशावानवाद्यान्यलाबुकं निखातमिति सप्त
यद्दीहनत्कथं हनत्पर्याकारं पुनः पुनरिति चैते वितत्तौ किरणौ द्वाविति षडनुष्टुभौ डुंउभि
माहननाभ्यां जरितरो थामोदैवकोशबिले जरितरो थामोदैव रजनिग्रंथेर्द्धानां जरितरो
थामोदैवोपानहिपादं जरितरो थामोदैवोत्तरां जनीमांजन्यां जरितरो थामोदैवोत्तरांज
नीवर्त्मन्यां जरितरो थामोदैवेति प्रतिगरो अवसाने विहेत्थ प्रागपागुदगिति चतस्रो द्वे

१

धाकारं प्रणवेनासंतन्वन्नलाबूनि जरितरोथामोदैवो ३म्॥ पृषातकानि जरितरोथामोदैवों ३॥ अश्वत्थपलाशं जरितरोथामोदैवो ३म्॥ पिपीलिकावटो जरितरोथामोदैवो ३मितिप्रतिग
राः प्रणवेषु भुगित्यभिगतइतित्रीणि पदानि सर्वाणियथा नित्रांतंश्वा जरितरोथामोदैवप
र्णशदो जरितरोथामोदैव गोशफो जरितरोथामोदैवेतिप्रतिगरौ वीमेदेवा अक्रंसतेत्यनुष्टु
प्पलीयीयक्ष्यते जरितरोथामोदैव होताविष्टीमेन जरितरोथामोदैवेतिप्रतिगरौ वादित्या
ह जरितरं गिरोभ्योदक्षिणामनयन्निति सप्तदशान्यो ह जरितरोथामोदैव तथाह जरितरो
थामोदैवेतिप्रतिगरौ व्यत्यासं मध्ये प्रणवन्नुत्तमस्त्वमिंद्र शर्म रिणोतिभूते छंदस्तिस्र
एता अनुष्टुभो यदस्या अंऊभेद्याइत्याह नस्या आज्या द्वयो क्ताश्चतुर्थे कृष्टन्नरोय
द्भ्राचीरजगंतेतिचैते॥ ई३ इइइइइ ई३ इइइइइ ई३ इइइ किमयमिदमाहो ३ ॐ ३ ॐ ३ ॐ ३

सू·उ·२ १०

मोथामो दैवो भित्यासांप्रतिगरो दधिक्राव्णो अकारिषमित्यनुष्टु प्सुतासो मधुमत्तमा

इति च तिस्रो वद्धेसो अंशुमती मतिष्ठदिति तिस्रोऽच्छावाम इंद्रमिति नित्यमेकाहिकं ॥ १॥

अथाच्छावाकस्य प्रवद्ध्रायवृत्रहत्तमायेति स्तोत्रियानुरूपौ वथेवयामरुद्गुक्तो वृ

षाकपिना॥ ओ ३ ओ ओ ओ ओ ओ ओ ३ ओ ओ ओ ओ ओ ओ ३ ओ ओ ओ मदेमधोर्मदस्यम

दिस्यमदेवो ३ ओ ३ ओ ३ ओ २ मोथामो दैवो मित्यस्य प्रतिगर ऋतुर्जनित्रीति नित्या

न्येकाहिकान्येव मुक्थानियत्र यत्र द्विपदासु स्तुवीरन्नित्यशिल्पं विदमहर्विश्वजि

च्चतो चेदग्निष्टोमो यदिवोक्थ्येष्व द्विपदासु स्तुवीरन्माध्यंदिनएवोर्ध्वमारंभणीया

भ्यः प्रकृत्या शिल्पानि शंसेयुर्बार्हतान्येव सूक्तानि वालखिल्यानां मैत्रावरुणः १०

सुकीर्तिं ब्राह्मणाच्छंसी वृषाकपिं च पंक्तिशंसं द्यौर्नयइंद्रेत्यच्छावाकः प्रत्येव

10

याम्मरुदित्येतद्वाचक्षते होतैवयामरुतमाग्निमारुते पुरस्तान्मारुतस्य पच्छः समा
समुत्तमे पदे षष्ठे त्वेवष्टष्ट्याह न्यहरहः शस्यस्यैकभूयसीः शस्त्वा मैत्रावरुणो दूरोहणं
रोहेत्संपातसूक्तएकाहीभवत्सु नत्वेकाहीभवत्स्वहरहः शस्यानि नारंभणीयानकद्रूतः
कद्रूतां स्थाने नित्याः प्रगाथान्छस्त्वा संपातानेव संपातवत्स्वहीनसूक्तानीतरेषु ततो
त्यान्येकाहिकानि संपातवत्सु तु सर्वस्तोमेषु प्राकृतेवैकाहे हीनसूक्तान्यादितस्त्तीयानि
सामसूक्तानि सप्रगाथानि सर्वपृष्ठेषु पृष्ठानि पृष्ठ्ये संस्था अग्निष्टोमः प्रथमं षोळशी
चतुर्थमुक्थ्यां इतर इति पृष्ठ्यः प्रत्यक्षपृष्ठो न्येः परोक्षपृष्ठ एते वैपस्त्षैवैरूपादीनाम
भावे पृष्ठ्यस्तोमः पवमानभावं आप कर्यपृष्ठ्यस्त न पृष्ठ्यो होतुश्चेच्छक्येत नोधसे॥४॥
अभिजिद्बृहत्पृष्ठ उभयसामा यद्यपि रथंतरं यज्ञायज्ञीयस्य स्थाने पिबवांस्त्विहसामप्रगाथः

सू॰ ३॰२
११

पिबा सोमंतमुष्टुहीति मध्यंदिनस्तयोरैकाहिके पुरस्तादन्येवाशंसेयुरेत एवेति गौतमः स
मदशात्वा तृचध्यस्यं यावत्योया वत्यः कुशानां नवतो दशतो वा निष्केवल्ये तावति सूक्तौ म
ध्यंदिनाः स्युरिति महान्यायो मरुत्वतीयस्योत्तमे विपरीते चातुर्विंशिकं तृतीयसवनम
भिप्लवत्र्यहः पूर्वः स्वरसामानः स्वराणि त्विह पृष्ठानि तेषां स्तोत्रियायज्जायथा अपूर्व्य
मत्स्यपायि ते महः एमेनं प्रत्येतने त्याद्यो वा सर्वेषां वयं घत्वा सुतावंत इति तिस्रो बृहत्यो
यस्ते साधिष्ठोवस इति षळनुष्टुभः इत्यनुरूपास्तोत्रियेयथायुक्ता बृहती तथानुरूपे स्था
यीन्येतानि यथा बृहद्रथंतरे ॥५॥ विषुवान्दिवाकीर्त्यं उदिते प्रातरनुवाकः पृथुपाजा अ
मर्त्य इति षड्धाय्याः सामिधेनीनां सौर्यः सवनीयस्योपालंभ्यः सोमापौष्णो वा समु
द्रादूर्मिरित्याज्यं त्यं सुमेषं कयाशुभेति च मरुत्वतीयं महादिवाकीर्त्यं पृष्ठं विभ्राड्बृ

११

हत्पिबतुसोम्यंमधु॥नमो मित्रस्यवरुणस्यचक्षस इतिस्तोत्रियानुरूपौ।यदिबृहद्रथंतरेपव
मानयोः कुर्यु।र्योनी॥ एनयोः शंसेद्।रथंतरस्यपूर्वमाद्येभवतो।ऽन्याभिरपिसंनिपात।उत्तमस्त्वि
हसामप्रगाथो।न णामुत्वान्नतमं गीर्भिरुक्थैरिति तिस्रो।यस्तिग्मशृंगोभित्यंमेषं।भिं
द्रस्यनुवीर्याणी।त्येतस्मिन्नैंद्रीनिविदंशस्त्वा।शंसेद्देवोत्तराणिषट्।दिवश्चिदस्यसुतइत्व
मेषप्रपूर्वी।र्वृषामदः प्रमंहिष्ठाय।त्यमू ष्विती हताक्ष्र्यमंततं।स्तस्यैकांशस्त्वा।ऽऽ कूयहूरोह
पंरोहेदितिनिष्केवल्यं।विकर्णंचेद्बृहत्सामो।र्ध्वमनुरूपा।त्तंवोदस्ममृतीषहमभिप्रवः सु
राधसमितिब्राह्मणाच्छंसी।इत्येतनोधसयोर्योनीशंसे।न्नोधसस्यपूर्वं।इत्येतस्योत्त
रांमेत।द्धोत्रकाणांयोनिरूछानं।यच्चप्रगाथश्चाक्रानमेताभ्यस्तत्पंचाहावपरिमितत्वा।
उत्तमेनाभिप्लविकेनोक्तं तृतीयसवनं।मेकाहिकौतुप्रतिपदनुचरौ।भासंचयज्ञायज्ञी

स्तृ.उ.२

१२

यस्यस्थानेपृक्षस्यवृक्णो अरूषस्य नूसहइतिस्तोत्रियानुरूपौ मूर्द्धानं दिवो अरतिं पृथि
व्यामूर्द्धा दिवो नाभिरग्निः पृथिव्याइतिवा न्यामुच्चेदेवं लिंगाः स्वतोनुरूपं आवृत्ता स्वर
सामानः॥ ६॥ विश्वजितोग्निंनरइत्याज्यं चतुर्विंशेनमध्यंदिनोवैराजंतुपृष्ठंसन्यूरवं बृ
हतश्चयोनिंप्राग्वैरूपयोन्या होत्रकाणांपृष्ठानि रााक्करवैरूपरैवतानितेयोनीः शंसं
तिवामदेव्यस्यमैत्रावरुणउक्तेब्राह्मणाच्छंसिनः कालेयस्याच्छावाकंऐकाहिकोस्तो
त्रियावेतयोर्येनीता अंतरेणकदूतश्चैतेषामेवपृष्ठानांसामप्रगाथान्त्सत्रामदासोयो
जातएवाभ्ररेकइतिसामसूक्तानिपुरस्तात्सूक्तानामुक्तंतृतीयसवनमुत्तमेनपृष्ठ्याहै
काहिकोतुप्रतिपदनुचरौ बृहच्चेदग्निष्टोमसाम त्वमग्नेयज्ञानामितिस्तोत्रियानु
रूपाविति नवरात्रः सर्वेग्निष्टोमाउक्थ्यानेकेस्वरसाम्नो द्वितीयमाभिप्लविकं गो

१२

रायुरुत्तरं त्र्यहक्लृप्तेपूर्वस्मात्र्यहात्सवनशोयथांतरं गोरायुरुत्तरात्पक्लृहक्लृप्तेयुग्मेभ्यो
गोरयुजेभ्यः आयुर्दशरात्रेपृष्ठ्यः षळहः पूर्वत्र्यहः पुनश्छंदोमा नत्वत्ररूछायि वैरूपंतत्ती
येप्रथमस्य छांदोमिकस्य द्विपृक्तोमध्यंदिनो वैषुवते निविद्धानेपूर्वेचद्वितीयस्य त्रांसाम
हांमहश्चित्त्वमिंद्रपिबासोमममभितमस्यद्यावापृथिवीमहांइंद्रोन्ववदितिमरुत्वतीयंमृपू
र्यपुरुतमानितांसुतेकीर्तित्वमहांइंद्रयोहदिवश्चिदस्यत्वंमहांइंद्रतुभ्यमितिनिष्केवल्यंतत्ती
यस्येंद्रः स्वाहागायत्सामतिष्ठाहरीप्रमंदिनंइमाउत्वेतिमरुत्वतीयंसंचत्वेजग्मुरितिसूक्ते आ
सत्योयात्वहंभुवंतत्तइंद्रियमितिनिष्केवल्यमायाहिवनसेमानुकंबभ्रुरेकइतिद्विपदासूक्ता
निपुरस्ताद्वैश्वदेवसूक्तानामितिनुसमूहळः॥ ७॥ व्यूहळश्चेत्पृष्ठ्यस्योत्तरेत्र्यहेमध्यंदिने
षुगायत्राँस्तचानुपसंशस्यतेषुनिविदोदध्यादिमंनु मायिनंऊवेत्यमुवः सत्रासाहंमरु

सू.उ.२

१३

13

त्वाँ इंद्रमीढुस्त्वमिंद्रं वाजयामस्य यं हये नवा इंद्रमुप नो हरिभिः सुतमिति त्रैष्टुभान्येषां
तृतीयसर्वनानि चतुर्थे हन्या देवो यातु प्र द्यावेति वासिष्ठं प्र ऋभुभ्यः प्रशुक्रै त्विति वैश्व
देवं वैश्वानरस्य सुमतौ कई व्यक्ता अग्निं नर इत्याग्निमारुतं मष्टादशोत्तमे विराजौ
द्विपदा एकादशा मारुतं एकविंशति वैश्वदेव सूक्ते पंचमस्यो दुष्यदेवः सविता दमूना इ
ति तिस्रो मही द्यावापृथिवी इह ज्येष्ठे इति चतस्र ऋभुर्विभ्वा स्तुषेजनमिति वैश्वदेवं ह
विष्पांतं वपुर्नुतदग्निर्होता गृहपतिः स राजेति तिस्र इत्याग्निमारुतमुत्तमा वैश्वदेवसूक्ते
साध्या सोत्तमा जातवेदस्ये सर्वत्राध्यासानुपसमस्य प्रणुया त्वष्टस्यो दुष्यदेव इति गा
र्त्समदं किमुश्रेष्ठ उप नो वाजा इति त्रयोदशार्भवं चतस्रश्च वैश्वदेवसूक्ते त्व च मंत्यमु
ह्वरेदिति वैश्वदेवं महश्च क्षत्रं मध्वो वो नाम सप्तत्रथेत्याग्निमारुतमिति षष्ठ्यः ॥८॥

१३

अथ च्छंदोमाः समुद्रादूर्मिरित्याज्यं मा वायो भूषं शुचिपा उप नः प्रयाभिर्यासि दाश्वांस
मच्छा नो नियुद्भिः शतिनीभिरध्वरं प्र सोता जीरो अध्वरेष्वस्थाद्ये वायव इंद्र मादनासो
या वां शतं नियुतो याः सहस्रमित्येकपातिन्यः प्र यद्वां मित्रावरुणा स्पूर्धन्ना गोमता ना
सत्या रथेना नो देव शवसा याहि शुष्मिन्न वो यज्ञेषु देवयंतो अर्चन्न क्षोदसा धायसा स
स्र एषेति प्रउगं माध्यंदिने सूक्ते विपरिहृत्यैतरयोर्निविदो दध्याद्देवमुत्तरयोश्चतुर्थपं
चमे अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवा अयं देवाय जन्मन इति तृचाः एभिरग्ने उव इति
वैश्वदेवं नित्यानि द्विपदाः सूक्तानि वैश्वानरो अजीजनदित्येका स विश्वं प्रति चाकॢपदृ
तून् उत्सृजते वशी ॥ यज्ञस्य वय उत्तिरन् ॥ वृषा पावक दीदिह्यग्ने वैश्वानर द्युमत् ॥ जम
दग्निभिराहुतः ॥ प्र यद्वस्त्रिष्टुभं दूतं व इत्याग्निमारुतं ॥ १ ॥ द्वितीयस्याग्निं वो देव

सू०उ०२

१४

मित्याज्यं कुविदंगनमसाये वृधासः पीवो अन्नाँरयि वृधः सुमेधाउछन्तुषसः सुदिना

अरिषाद् इत्येकपाति न्यउग्रां ताहूता नरभ्याय गोपायावत्तरस्तन्वो याव द्योज इत्येकाद्वे

चप्रतिवांसूरउदिते सूक्तैः धेनुः प्रत्नस्य काम्यं उहोना ब्रह्माणं इडोपययाहि विद्वान् ध्र्वौ

अग्निः सुमतिंवस्वो अश्ने उतस्यानः सरस्वती जुषाणेति प्रउगं हिरण्यपाणि मूतयइ

तिचतस्रो मही द्यौः पृथिवी च नो युवाना पितरापुनरिति त्वं चौर्देवानामिदव इतिवैश्व

देवम् तावानं वैश्वानरम् तस्य ज्योतिषस्पतिं॥ अजस्रं घर्ममी महे॥ दिविपृष्टोअ

रोचताग्निर्वैश्वानरो महान्॥ ज्योतिषाबाधतेतमः॥ अग्निः प्रत्नेषु धामसु कामो

भूतस्य भव्यस्य॥ सम्राळेको विराजति॥ क्रीळंवः शर्धोग्ने मळे त्याग्निमारुतं॥

॥१०॥ तृतीयस्यागन्ममहेत्याज्यं प्रवीरयाशुचयो दद्रिरेते सत्येन मनसा दीध्या

१४

नादिविक्षयं तारजंसः पृथिव्यामाविश्ववाराश्वि नागतं नो यं सोम इंद्र तुभ्यं सुन्व
आतु प्र ब्रह्माणो अंगिरसो नक्षंत सरस्वती देवयंतो हवंत आ नो दिवो बृहतः पर्वता
दा सरस्वत्यभि नो नेषि वस्य इति प्रउगमेकपातिन्य उत्तमो दो षो आगात्य वांमहि
घवी अभीतितच्चौ विंद्र इषेदद्दातु नस्तेनो रत्नानिधत्तनेत्येकाद्वेच येत्रिंशतीतिवै
श्वदेवं वैश्वानरो न ऊतय आप्रयातु परावतः॥ अग्निर्नः सुष्टुती रुप॥ वैश्वानरो
न आगमदिमंयज्ञं सजूरुप॥ अग्निरुक्थेन वाहसा॥ वैश्वानरो अंगिरोभ्यः स्तो
म उक्थं च चार्कनत॥ ऐषु द्युम्नं स्वर्यमत्॥ मरुतो यस्य हि प्राग्नयेवाचमित्याग्नि
मारुतं॥ ११॥ दशामेहन्यनुष्टुभां स्थानेग्निं नरो दीधितिभिररण्योरिति तच्च मा
ग्नेयेकं तां उषा अप स्वसुस्तम इति पच्छो द्विपदां त्रिरुषस्य आशुभ्यायातमश्वि

नास्वश्चेति तच माश्विने क्रतौ स्तोकसूक्तस्य द्वितीयतृतीययोः स्थाने ऽग्ने घृतस्य धी
तिभिरुभेसु श्चंद्रसर्पिष इत्येते इदमापः प्रवहते त्येतस्याः स्थाने आपो अस्मान्मात
रः शुंधयंत्वित्य च्छावो अग्निमवसे प्रत्य स्माइतित्तचयोः स्थाने ऽच्छा नः शीरशोचि
षं प्रतिश्रुताय वो धृषदिति त्तचावच्छावाकः परित्वाग्ने पुरं वयमित्येतस्याः स्थाने ऽग्ने
हंसि न्यत्रिणमित्युत्तिष्ठता वपश्यतेत्येतस्याः स्थाने उत्तिष्ठन्नोजसा सहेत्युरु विष्णो
विक्रमस्वेति घृतयाज्याः स्थाने भवा मित्रो न शेव्यो घृतासुतिरित्यहरहश्चाहर्गणेषु
यत्रैतदहः स्यात्सिनीवाल्या अभ्यस्येदित्येके नास्मिन्नहनि केन चित्कस्य चिद्धि
वाच्यमविवाक्यमित्येतद्दाचक्षते संशये बहिर्वेदि स्वाध्याय प्रयोगो ऽन्तर्वेदीत्येके
न व्यंजने नोपहितेन वार्थः प्रत्यसित्वा भाय श्चित्तं जुहुयुरग्ने तमद्याश्वं न स्तोमै

रित्याज्यं पंचाक्षरेण विग्रहो दशाक्षरेण वा त्वां रथं य थो तय इत्येतस्यास्थाने त्रिकद्रुकेषु
महिषो यवाशिरमिति सखाय आ शिषामही ति तिस्र उष्णिहो मरुत्वाँ इंद्रेति मरुत्वतीयं क
यान श्चित्र आभुवदित्येतासु रथंतरं पृष्ठं तस्य योनिं शंसेद्बृहतश्च गाणगारिर्दशरात्रेयु
ग्मान्वय त्वां तार्क्ष्यं पौकपदाउपसंशास्य ऋ गावानमेकपदाः शंसेदिंद्रो विश्वस्य गोप
तिरिति चतस्र उत्तमयोपसंतानोऽयइंद्रसोमपातम इति षळुष्णिहो युध्मस्यत इति निष्के
वल्यं तत्सवितुर्वृणीमह इत्येतस्यास्थाने ऽभित्यं देवं सवितारमोण्योरित्यृभुक्षण इत्या
र्भवं पश्वा न तायुमिति द्वे पदे समिद्धमग्निं समिधा गिरा गृण इति तिस्रश्च द्विपदी कं जा
तवेदस्यं चतुर्थेन व्यूळ्हस्येतरा णि सूक्तानि वामदेव्यमग्निष्टोमसामाग्निं नरो
दीधितिभिररण्योरिति स्तोत्रियानुरूपौ वग्निष्टोम इद महरूर्ध्वं पत्नीसंयाजेभ्यः॥

स्र॰उ॰२

१६

॥१२॥ गार्हपत्येनुद्रुतीहरमेहरमध्वमिहध्वतिरिहस्वधतिरग्नेवाट्स्वाहावाडित्याग्नीध्री
येउपस्र जंधरूणंमातरंधरुणोधयन्॥ रायस्पोषमिषमूर्जमस्मासुदीधरत्स्वाहेतिस
दः प्रस्रप्यमानसेनस्तुवतेयर्हिस्तुतंमन्येताध्वर्यवित्याक्रयीतहोहोतारितीतर आयं
गौः पृश्निरक्रमीदित्युपांशुतिस्रः पराचीः शस्त्वाथ्याख्यास्वरेणचतुर्होतृन्व्याचक्षी
तदेवावात्रअध्वर्योप्रजापतिगृहपतयः सत्रमासतोहोतस्तथाहोतरित्यध्वर्युः प्रतिगृणा
त्यवसितेवसितेदशसुपदेषुतेषांचित्तिः स्रुगासी३त्॥ चित्तमाज्यमासी३त्॥ वाग्वेदिरा
सी३त्॥ आधीतंबर्हिरासी३त्॥ केतोअग्निरासी३त्॥ विज्ञातमग्नीदासी३त्॥ प्राणो
हविरासी३त्॥ सामाध्वर्युरासी३त्॥ वाचस्पतिर्होतासी३त्॥ मनउपवक्तासी३त्॥
तेवाएतंग्रहमगृह्णत॥ वाचस्पतेविधेनामन्॥ विधेमतेनाम॥ विधेस्त्वमस्मा

१६

कं नाम्नाद्यां गच्छ॥ यां देवाः प्रजापतिं गृहपतयऋद्धिमराध्नुवँस्तामृद्धिं रात्स्याम
इत्यपव्रजत्यध्वर्युरथ प्रजापतेस्तनूरितरउपांश्वनुद्रवति ब्रह्मोद्यं चान्नादा चान्न
पत्नी च भद्रा च कल्याणी चाऽनिलया चापभया चाऽनाप्ता चानाप्या चाऽनाधृष्या
चाप्रतिधृष्या चाऽपूर्वा चाभ्रातृव्या चेति तन्वोऽग्निर्गृहपतिरिति हैक आहुः सोऽस्य लो
कस्य गृहपतिर्वायुर्गृहपतिरिति हैक आहुः सोऽन्तरिक्षलोकस्य गृहपतिरसौ वै गृहपति
र्योऽसौ तपत्येष पतिरृतवो गृहाः॥ येषां वै गृहपतिं देवं विद्वान् गृहपतिर्भवति राध्नो
ति स गृहपती राध्नुवंति ते यजमानाः॥ येषां वा अपहतपाप्मानं देवं विद्वान् गृहपति
र्भवत्यप स गृहपतिः पाप्मानं हते पते यजमानाः पाप्मानं घ्नतेऽध्वर्यो अरात्स्मेत्यु
च्चैरेषा याज्यैष वषट्कारो नानुवषट्करोत्युक्तं वषट्कारानुमंत्रणमरात्स्म होतरित्य

स्तू·उ·२
१७

17

ध्वर्युः प्रत्याह मनसा ध्वर्युर्ग्रहं गृहीत्वा मनसा भक्षमाहरति मानसेषु भक्षेषु मनसो
पक्वान भक्षणे मनसात्मानमाप्याययो डुंबरीं समन्वारभ्य वाचं यच्छंत्या नक्षत्रदर्श
नात्तत्रानधराग्न्याणां श्विकी षेरन्त्रयमानेष्वध्वर्युमुखाः समन्वारब्धाः सर्पत्याती
र्थदेशाद्ध्रुवं तमिंद्रापर्वतापुरो युधेति जपंतोध्वर्युपथेनेत्येके दक्षिणस्य हविर्धानस्याऽ
धोक्षेणेत्येके प्राप्यवरान्वृत्त्वा वाचं विसृजंते यदिहोनमकर्म यदत्यरीरिचाम॥ प्रजा
पतिं त्वा पितरमप्येत्विति यथवाचं निष्क्रवंते वागेतु वागुपैतु वागुपमेतु वागित्युत्करदे
शे सुब्रह्मण्यां निराहूय वाचं विसृजंते नित्यास्त्विह वाग्विसर्ग एतावत्सात्रं होतृकर्माऽन्य
त्र महाव्रतात्तदेषाभियज्ञगाथा गीयते॥ अतिरात्रश्चतुर्विंशं षळहावभिजित्स्वराः॥
विषुवान्विश्वजिच्चैव छंदोमा दशाममव्रतं॥ प्रायणीयश्चतुर्विंशं पृष्ठ्यो भिप्लव एव च॥

१७

अभिजित्स्वरसामानो विषुवांश्चिश्च जित्तथा॥ छंदोमादशमंचाहं उत्तमंतु महाव्रतं॥
अहीनैकाहःसत्राणां प्रकृतिः समुदाह्रियते॥ यद्यन्यधीयते पूर्वंधीयते तं प्रतिग्रामं
त्यहानि पंचविंशतिर्यै वैसंवत्सरोमितः॥ एतेषामेव प्रभवस्त्रीणिषष्टिशतानियदि
तिंतद्येकेच नछांदोग्येवाऽध्वर्यवेवाहोत्रामशाः समाम्नातानतान्कुर्याद्दृष्टत्वात्त्वाद्धो
त्रस्यं छंदोगप्रत्ययं स्तोमस्तोत्रियः पृष्ठसंस्थे त्यध्वर्युप्रत्ययंतु व्याख्यानं कामकालदेश
दक्षिणानां दीक्षोपसत्प्रसवसंस्थोत्थानानामेतावत्त्वं हविषामुच्चैरुपांशुतायां हवि
षां चानुपूर्व्यमेतेभ्य एवाहोभ्योंहीनैकाहान्पश्चात्तरान्व्याख्यास्यामः॥ १३॥ एतद्वि
दं ब्रह्मचारिणमनिराकृतिनं संवत्सरावमं चारयित्वा व्रतमनुयुज्यानुक्तोग्निनेप्रव्र
यांदुत्तरमहर्महानाम्नीरग्नेउदगयनेपूर्वपक्षेश्वोष्यन्बहिर्ग्रामात्स्थालीपाकं तिल

मिश्रं श्रपयित्वाऽऽचार्याय वेदयीत तद्विदितेव्रतसंज्ञाया न्यद्धौ लघुमात्राश्चेदापत्का
रिताः स्युरन्वारब्धे जुहुयादग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो ऽधिराज
एषः॥ तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माकं मोमुहद्भा
गधेयं स्वाहा॥ या तिरश्ची निपद्यते ऽहं विधरणी इति॥ तां त्वा घृतस्य धारया यजे संरा
धनीमहं स्वाहा॥ यस्मै त्वा कामकामाय वयं सम्राड्यजामहे॥ तमस्मभ्यं कामं दत्वा
थेदं त्वं घृतं पिब स्वाहा॥ अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्॥ अ
यं शत्रूञ्जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसातौ स्वाहा॥ अस्त्वयं त्वं चानुमत्ये
च स्वाहा॥ प्रदात्रे स्वाहा॥ व्याहृतिभिश्चप्रत्यग्घुत्वा हैतं स्थालीपाकं सर्वमश्नानेति
युक्तवंतमपामंजलिपूर्णमादित्यमुपस्थापयेत्त्वं व्रतानां व्रतपतिरसि व्रतं चरि

ष्यामितच्छकेयंतेनशाकेयंतेनराध्यासमितिसमाप्यसंमील्यवाचंयच्छेत्काल
मभिसमीक्षमाणोयदासमयिष्यादाचार्येणैकरात्रमध्यायोपपादनात्रिरात्रं
वानित्याध्यायेनतमेवकालमभिसमीक्षमाणआचार्योहतेनवाससात्रिःप्रदक्षि
णंत्रिरःसमुखंवेष्टयित्वाहेतंकालमेवंभूतोस्वपन्भवेतितंकालमस्वपंनासी
तोऽनुवक्ष्यमाणेऽपराजितायांदिश्यग्निंप्रतिष्ठाप्याऽसिमुदकमंडलुमश्मानमित्यु
त्तरतोऽग्नेःकृत्वावत्सतरीप्रत्यगुदगसंश्रवणेबध्वापश्चादग्नेराचार्यस्तृणेषूपविश्यो
दपराजितांदिशमभिसमीक्षमाणोब्रह्मचारीलेपान्परिमृज्यप्रदक्षिणमग्निमाचार्यंच
कृत्वोपसंगृह्यपश्चादाचार्यस्योपविश्यतृणेष्वेवप्रत्यग्दक्षिणाभिसमीक्षमाणःपृ
ष्ठेनपृष्ठंसंधायब्रूयान्मनसामहानाम्नीर्भो३अनुब्रूहीतिपुनःपृष्ठानुक्रोशिने

संमील्येवानुब्रूयात्सपुरीषपदास्त्विरन्त्त्र्च्योन्मुच्योल्ळीषमादित्यमीक्षयेन्मित्र
स्यत्वाचक्षुषाप्रतीक्षेमित्रस्यत्वाचक्षुषासमीक्षेमित्रस्यवश्चक्षुषानुवीक्षइति
दिशाः ससंभाराः पुनरादित्यंमित्रस्यत्वाचक्षुषाप्रतिपश्याभियोस्मान्द्वेष्टियंचवु
यंद्विष्मस्तंचक्षुषोहेतुर्क्र्छत्विति भू मिमुपस्पृशेदग्नइळानमइळानमऋषिभ्यो
मंत्रकृद्भ्योमंत्रपतिभ्यानमोवोअस्तुदेवेभ्यः शिवानः शंतमाभवसुमळीकासर
स्वतिमातेव्योमसंदृशि॥ भद्रंकर्णेभिः श्रृणुयामदेवाः शंनइंद्राग्नीभवतामवोभिः
स्तुषेजनंसुव्रतंनव्यसीभिः कयानश्चित्रआभुवदितितिस्त्रः स्योनापृथिविभवे
तिसमाप्यसमानंसंभारवर्जंमेषद्भ्योः स्वाध्यायधर्मेआचार्यवदेकः फाल्गुनाद्याः
श्रवणायांअनधीतपूर्वाणामध्यायस्तेष्वाद्यधीतपूर्वाणामधीतपूर्वाणां॥ १४॥ ॥

॥ ॥ इतिश्रौतसूत्रे उत्तरषट्के द्वितीयोध्यायः ॥ ॥ हरिः ॐ ३ ॥ ॥ उक्तप्रकृतयोहीनैकाहाः
सिद्धैरहोभिरक्लृप्तामतिदेशा नातिदेशात्वेकाहो ज्योतिष्टोमो द्वादशाहात दक्षिणस्तेनशास्य
मेकाहानां गो आयुषी विपरीते द्व्यहानां त्र्यहाणां पृष्ठ्यत्र्यहः सर्वोभिप्लवत्र्यहो वैवंप्रा
याश्चदक्षिणाश्चर्वागतिरात्रेभ्यः साहस्रास्त्वतिरात्रा द्व्यहास्त्र्यहाश्चये भूयांसस्त्र्य
हादहीनाः सहस्रं तेषां त्र्यहे प्रसंख्यायान्वहं ततः सहस्राणि समावत्वेन दक्षिणान
येयुरतिरिक्तास्तूत्तमेधिकाश्चातिदिष्टानां स्तोमपृष्ठसंस्थान्यत्वाद्दन्यभावो नित्या
नैमित्तिका विकारा माध्यंदिने तु होतुर्निष्केवल्ये स्तोमकारितं शास्यं तत्रोपजनस्तार्क्ष्य
वर्जमग्रे सूक्तानां हानौ तत एवोद्धारो येर्वाक् त्रिवृतः स्तोमास्युस्तत्र चाएव तत्र सूक्तसंस्था
नेषु यथा नित्यानि विदोभ्युदियात् ॥ १ ॥ उक्तानि चातुर्मास्यानि सोमान्वक्ष्यामः पर्व

सू॰उ॰३

२०

णां स्थाने ऽयूपकानेकेपरिधौ पशुं नियुंजंतिवैश्वदेव्या स्थाने प्रथमं एष्ट्या हेर्जेनिष्ठा उग्र
उग्रोज ज्ञ इतिमध्यंदिनेऐकाहिकाहोत्राः सर्वत्र प्रथम सांपातिकेष्वहः स्वैकाही भवत्सुवै
श्वानर पार्जन्येह विषी अग्नी षोमीयस्य पशोः पशुपुरो ळाशो न्वा या तयेयुः प्रातः सव
निकेषु पुरोळाशेषु वैश्वदेव्या हवी ष्य न्वायातयेयु वैश्वदेवः पशुर्बार्हस्पत्या नूबंध्या वरु
णप्रघास स्थाने द्य हउ त्तरस्याह्नः प्रातः सवनिकेषु पुरो ळाशेषु वरुणप्रघासहवी ष्यन्वा
यातयेयुर्मारुत वारुणोपशुर्मैत्रावरुण्यनूबंध्याऽग्निष्टोमऐंद्राग्नस्थानेसाकमेधस्थाने त्र्यहो
तिरात्रां तोह्निती यस्या ह्नोनुसवनं पुरोळाशेषु पर्वेद्यु र्हवींषितृतीयेह न्युपांश्वंतर्यामौऊत्वा
पौर्णदर्वं प्रातः सवनिकेषु क्रैळिनं माध्यंदिनेषु माहेंद्राण्यंतरेण घृतया ज्येदक्षिणेमार्जा
लीयेपित्र्यांतत्रोपस्थानंयथानतिप्रणीयचरतामनूबंध्यायाः पशुपुरोळाशोआदित्य

२०

20

मन्वायातयेयुराग्नेय्यैंद्राग्नैकादशिनाः पशावः सौर्यानूबंध्या ऽग्निष्टोमः शुनासीरीयायाया
स्थानेप्रातःसवनिकेषुपुरोळाशेषुशुनासीरीयायाहवींष्यन्वायातयेयुर्वायव्यः पशुराश्वि
न्यनूबंध्यान्वहं पंचाशाच्छोदक्षिणाः॥२॥ अथराजसूयाः पुरस्तात्फाल्गुन्याः पौर्णमा
स्याः पवित्रेणाग्निष्टोमेनाभ्यारोहणीयेनयजेत पौर्णमास्यांचातुर्मास्यानिप्रयुंक्ते नि
त्यानिपर्वाणि चक्राभ्यांतुपर्वांतरेषु चरंत्यहर्विपर्ययंपक्षविपर्ययंवासंवत्सरांतेसमानप
क्षेभिषेचनीयदशापेयाउक्थ्यो बृहत्पृष्ठ उभयसामाभिषेचनीयः संस्थितेमरुत्वतीयेदक्षि
णतआहवनीयस्यहिरण्यकशिपावासीनोभिषिक्तायपुत्रामात्यपरिवृतायराज्ञेहोतानः
शेपमाचक्षीतहिरण्यकशिपावासीनआचष्टेहिरण्यकशिपावासीनः प्रतियशोवैहिरण्यं
यशासैवैनंतत्समर्द्धयत्योमित्यृचः प्रतिगरएवंतथेतिगाथायाओमितिवैदैवंतथेतिमा

गृणाति

नुषं दैवेन चैवैनं तन्मानुषेणाच्च पापादेनसः प्रमुंचति तस्माद्योराजा विजिती स्या
दप्ययजमान आख्यापयेतैवैतच्छोनःशेपमाख्यानं नहास्मिन्नल्पं चनैनः परिशि
ष्यते सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे यथा स्वमासने संसृप्ते ष्टिभिश्चरित्वा दश
पेयेन यजेत तत्र दशादशैकैकं चमसं भक्षयेयुर्नित्यान्नूप संख्यायेतरान्नुप्रसर्पयेयुर्ये मा
त्ततः पितृतश्च दश पुरुषं सममनुष्ठितां विद्यातपोभ्यां पुण्येश्च कर्मभिर्येषामुभयतो नाब्राह्म
ण्यं निनयेयुः पितृत इत्येके नवग्वासः सुतसोमास इं इं सखा हयत्र सखिभिर्नवग्वैरिति नि
विद्धानयोराद्ये सूक्तमुखीये इत्युक्त एते प्रतीया उत्तर आपूर्यमाणपक्षे केशवपनीयो
दृहत्स्थोतिरात्रो द्वयोर्मासयोर्व्युष्टिद्व्यहोऽग्निष्टोमः पूर्वमहः सर्वस्तोमोऽतिरात्र उत्तर
मुत्तर आपूर्यमाणपक्षे क्षत्रस्य धृतिरग्निष्टोमः ॥३॥ इति राजसूयां न्यायकृप्ताश्च दक्षि

णां अन्यत्राभिषेचनीय दशपेयाभ्यामभिषेचनीयेतु द्वात्रिंशतं द्वात्रिंशतं सहस्राणि
पृथग्मुख्येभ्यः षोडशषोडशद्वितीयिभ्योऽष्टावष्टौ तृतीयिभ्यश्चत्वारिचत्वारिपा
दिभ्यः संसृपेष्टीनां हिरण्यमाग्नेय्यां वत्सतरी सारस्वत्याम वध्वस्तः सावित्र्यां श्या
मः पोष्ण्यां शितिपृष्ठो बार्हस्पत्यायामृषभः ऐन्द्र्यां महानिरष्टो वारुण्यां साहस्रो दशपे
ये इमाश्चादिष्टदक्षिणाः सौवर्णस्रगुद्गातुरश्वः प्रस्तोतुर्धेनुः प्रतिहर्तुरजः सुब्रह्मण्या
यै हिरण्यप्राकाशावध्वर्योराजतो प्रतिप्रस्थातुर्द्वादशपष्ठौह्यो गर्भिण्यो ब्रह्मणो वशा
मैत्रावरुणस्य रुक्मो होतुर्ऋषभो ब्राह्मणाच्छंसिनः कार्पासं वासः पोतुः क्षौमी बरा
सी नेष्टुरेकयुक्तं यवाचितमच्छावाकस्यानड्वानाग्नीध्रस्य वत्सतर्युन्नेतुस्त्रि
वर्षः सांडो ग्रावस्तुतः ॥४॥ उशनसः स्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजे

स्र०·उ·३

तो शनायत्सह स्ये उ रयातं त्व म पोयद् वे तुर्व शायेति सूक्त मुखीये गो स्तोम भूमिस्तो
मे वनस्पति सवानां नता अर्वी रेणुकं काटो अश्नुते नता न शांति नद् भाति तिस्करो ब
ळित्था पर्वता नां दृळ्हा चिद्या वनस्पती न् देवेभ्यो वनस्पते हवींषि वनस्पते रशनया नि
यूयेति सूक्त मुखीयां आधिपत्यकामो ब्रह्मवर्चसकामो वा बृहस्पतिसवेन यजेत तस्य
त्र्चाः सूक्त सुष्ठा नेष्वग्निर्देवेषु राजती त्या ज्येयस्त स्तंम धुनेतयइति सूक्त मुखीये इंद्रमरुत्व
इह न्रणामुत्वेति मध्यंदिनं उ दुष्यदेवः सविता हिरण्यया घृतवती भुवनाना मभिश्रियेंद्र क्र
भुभिर्वाजवद्भिः समुक्षितं स्वस्ति नो मिमीतामश्विना भग इति वैश्वदेवं वैश्वानरं मन
सा ग्निं निचाय्य प्रयंतु वाजा स्तविषीभिरग्नयः समिद्धमग्निं समिधा गिरा गृण इत्या
ग्निमारुतं होत्रकाऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमां स्तृचान्छंसेयुः प्रगा

२२

22

थेभ्यस्तुमाध्यंदिनेऽनुसवनमेकादशैकादशादक्षिणाएकादशैकादशावासहस्रा
णिशताानिवाऽश्वोमाध्यंदिनेधिकोभुवाभ्रातृव्यवा नधिबुभूषुर्यजेतसद्यस्क्रि
यानु क्रियापरिक्रियावास्वर्गकामएकत्रिकेणत्र्येकेनवाऽन्नाद्यकामोगोतमस्तो
मेनयइच्छेद्दानकामामेप्रजास्यादित्येतेषांसप्तानांशास्यमुक्तं बृहस्पतिसवेनत्वं
भुवःप्रतिमानंपृथिव्याभुवस्त्वमिंद्रब्रह्मणामहान्त्सद्योहजातोवृषभःकनीनस्त्वं
सद्योअपिबोजातइंद्रांनुत्वाहिघ्नेअधदेवदेवाअनुतेदायिमुहइंद्रियायकथोनुतेप
रिचराणिविद्वान्नितिर्ह्रेएकस्यचिन्मेविभ्वंस्त्वोजएकंनुत्वासत्पतिंपांचजन्यंत्र्यर्युमामनुषो
देवतातामघान्वस्यमहतोमहानीत्थाहिसोमइन्मदइंद्रोमदायवावृधइतिसूक्तमुखीयाः॥
॥५॥गोतमस्तोममंतरुक्थ्यंकुर्वंतिग्रहांतरुक्थ्यश्वेदग्नेमरुद्भिर्ऋक्कभिःपादुद्राव

रुष्णाभ्यां मत्त्वेंद्रा बृहस्पतिभ्यां मिंद्राविष्णुभ्यां सजूरित्याग्निमारुते पुरस्तात्परिधा
नीयाश्रावयेतो भय्यो राका नमन्यतरस्यामेके उक्थ्यः स्तोत्रियेषु चैंद्य द्वायज्ञीयेनस्वै
र्वा सह ह्राह्रूय स्तोत्रियाँस्तथानुरूपान्न न्यत्राप्येवं स्तोत्रियानुरूपसंनिपाते यद्युवैय
ज्ञायज्ञीययो नौ सर्वे रे वो क्थ्यसाम भिः प्रकृत्यास्यात्तथा सति॥ ६॥ श्येनाऽजिराभ्या
मभिचरन्यजेताऽहं मनुर्गर्भे नु सँ स्त्वया मन्योयस्ते मन्य विति मध्यंदिनौ शेषो बृह
स्पति सवेन सन्न द्धा लोहितो ष्णी षा निस्त्रिंशिनो याजयेयुः शारमयं बर्हि मौ सलाः
परिधयो बैभीतक इध्मो वा घातको वाऽपमृर्या श्रावयेत्प्रत्याश्रावयेच्छ्वं छिंदन्नि
व वषट् कुर्याद्दुषन्निव जुहुयात्साद्य स्क्रेष्वर्वरावेदिः खल उत्तरवेदिः खले वा
ली यूपः स्फ्यग्रो यूपो चषालः कलापी चषाल इत्यागंतुकाविकारांश्चान्याँश्चाध्वर्यु

२३

वो विदुः सिद्धे तु त्रास्ये होता संप्रैषान्वयः स्यात्पाप्याकीर्त्याऽभिहतो महारोगेण वा
यो वालं प्रजननः प्रजां न विंदेत सोऽग्निष्टुता यजेतेति ष्ठाहरी यो जात एवेति मध्यंदिनः
स वाग्नेयश्चेत्स्तोत्रियानुरूपा आग्नेयाः स्युर्विचारि वाऽपि वा सर्वेषु देवताशब्देष्व
ग्निमे वाऽभिसंनमेत्तथा सत्यन्वक्षमिंद्रस्तुता यजेतेंद्र सोममिंद्रस्त्वेति मध्यंदिनो
भूतिकामो वा ग्रामकामो वा प्रजाकामो वोपहव्येन यजेतेमा उ त्वा य एक इदिति मध्यं
दिन ऐंद्राग्न्योः कुलायेन प्रजातिकामस्तिष्ठाहरी तमु ष्टुहीति मध्यंदिनं ऋषभेण विजि
गीषमाणो मरुत्वाँ इंद्र युध्मस्य त इति मध्यंदिनं स्तीव्रसोमेनान्नाद्यकामः क्व स्य वीर
स्तीव्रस्याभि वयस इति मध्यंदिनो विघनेनाभिचरँस्तस्य त्रास्य मार्जिरेणेंद्राविष्णू
रुत्क्रांतिना स्वर्गकाम इमा उ त्वा द्योर्न य इंद्रेति मध्यंदिनो यः कामयेत नैच्छिद्यं पा

सू॰ ३॰ ३

२४

25

ष्मन इयामितिस ऋतपेयेन यजेत ऋतस्यहि शुरुधः संतिपूर्वीरिति सूक्तमुखीये
सत्येन चमसान् भक्षयंति सत्यमियं पृथिवी सत्यमयमग्निः सत्यमयं वायुः स
त्यमसावादित्य इति सोम चमसो दक्षिणा ॥ ७ ॥ अतिमूर्त्तिना यक्ष्यमाणो मासं सौर्या
चांद्रमसीभ्यामिष्टीभ्यां यजेत शुक्लं चांद्रमस्यासो र्ययेतरं म त्राह गोरमन्वतन नवो
नवो भवति जायमानस्तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीक भितियाज्यानुवा
क्याः स ईं महीं धुनिमेतोररम्णात्त्वमेना अ्युप्याचुमुरिं धुनिं चेति सूक्तमुखीये सू
र्यस्तुता यशस्कामः पिबा सोमम भीन्द्र स्तवेतिम ध्यंदिनो व्योम्नान्नाद्यकामो विश्व
देवस्तुता यशास्कामः पंचदशारदीयेन पशुकामः एतेषां त्रयाणां कयाशुभा तदिहा
सेतिम ध्यंदिनं उभयसामा नो पूर्वा उक्थ्यः पंचदशारदी यो विश्वो विश्वो वो अति

२४

थिमित्याज्यं कण्वरथंतरं पृष्ठं गोसव विवधौपशुकामः इंद्रसोममे तायामेति मध्यं
दिनोदशसहस्राणिदक्षिणाः षोळशीकाहआयुर्गौरितिव्यत्यासमुद्धिहलभिदोस्व
र्गकामः इंद्रसोममिंद्रः पूर्भिदितिमध्यंदिनो विनुत्याभिभूत्योरिषुवज्रयोश्चमन्युस्तू
के अभिचरन्यजेतत्विष्यपचित्योः सम्राट्स्वराजोराड्विराजोः शादस्यचैकाहिके उप
शादस्यराशिमरायययोश्च कयाशुभीयतद्विदासीयेभूतिकामराज्यकामान्नाद्यकामें
द्रियकामतेजस्कामानामेतेकामाद्वयो ईयो ऋषिस्तोमाव्रात्यस्तोमाश्च पृष्ठ्याहानि
नाकसदृतुःस्तोमादिकुस्तोमाश्वाभिप्लवाहानि॥ ८॥ वाजपेयेनाधिपत्यकामः
सप्तदशादीक्षाः सप्तदशापवर्गोवाहिरण्यस्त्रजऋत्विजोयाजयेयुर्वज्रकिंजल्का
शतपुष्कराहोतुर्विश्वजिद्दाज्यंकयाशुभातद्विदासेतिमध्यंदिनः संस्थितेमरुत्वतीये

सू·३·३
२५
25

बार्हस्पत्येष्टिं राज्यभागप्रभृतीक्वांतां बृहस्पतिः प्रथमंजायमानो बृहस्पतिः स
मजयद्वसूनि त्वामीळते अजिरं दूत्यायाग्निं सुदीतिं सुदृशं गृणंत इति संयाज्ये य
दि त्वध्वर्यवे आजिं जापयेयुरथ ब्रह्मा तीर्थदेशे मयूखे चक्रं प्रतिमुक्तं तद्दारु त्र्यं
प्रदक्षिणमावर्त्यमाने वाजिनां साम गायाद्दाविर्भर्या आवाजं वाजिनो अगमन् दे
वस्य सवितुः सवे॥ स्वर्गाँ अर्वंतो जयत स्वर्गाँ अर्वंतो जयतीति वा यदि सामनाधी
यात्त्रिरेतामृचं जपेत्तती येनाभिह्लाविकेनोक्तं तत्तीयसवनं चित्रवतीषु चेत्स्तु
वीरँ स्त्वं नश्चित्र ऊत्या अग्ने विवस्वदुषस इत्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ
षोळशी त्विह तस्माद्धर्वमतिरिक्तोक्थं प्रतत्ते अद्य शिपिविष्ट नाम प्रतद्विष्णुः स्त
वते वीर्येणेति स्तोत्रियानुरूपौ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्यत्ते दित्सु प्रराध्यं त्वामि

२५

च्छ वसस्पते तं प्रत्नथेति त्रयोदशा नामेकां त्रिंशूऽऽ रूयदूरोहणं रोहे बृहस्पतेयुव
मिंद्रश्चवस्वइतिपरिधानीयां विश्वाद्दू बृहत्पिबतु सोम्यं मध्विति याज्यां तस्य गवां श
ता नाम श्वरथानामश्वानां साद्यानां वध्वानां महानसानां दासीनां निष्ककंठीनां हस्ति
नां हिरण्यकक्ष्याणां सप्तदशा सप्तदशानि दक्षिणां दशान्ये दक्षिणागणाधनानां श ता
वमापराध्या नां पूर्वान्वाग णशोभ्यस्ये त्सप्तदशा सप्तदशा संपादयेदिति वाजपेय
स्तेने ष्ट्वा राजा राजसूयेन यजेत ब्राह्मणो बृहस्पतिसवेन ॥ २ ॥ अनिरुक्तस्य चतुर्विं
शेन प्रातः सवनं च तृतीयसवनं च तं प्रत्नथेति तृत्रयोदशा वैश्वदेवं कया शुभा
तदिदासेति मध्यंदिनो होत्रकाऊर्ध्वं स्तोत्रिया नुरूपेभ्यः प्रथमान्त्संपाता न्
छंसेयुरहीन सूक्तानि वैवं पूर्वे सवने बृहत्पृष्ठे ष्वसमाम्नाते षु प्रतिकामं वि

स्र॰उ॰३

२६

26

ष्वजिच्छिल्पं स्तस्य समानं विश्वजिता प्रगाथेभ्यो बृहस्पतिसवे नाज्यं निष्केवल्य
मरुत्वतीयो च तच्चौ ताभ्यां तु पूर्वे ऐकाहिके होत्रका ऊर्ध्वं प्रगाथेभ्यः शिल्पान्यविकृतानि
शंसेयुः साम सूक्तानि चाद्यास्तु चानही न सूक्तानामं त्यानामैकाहिकानामुत्तमान्त्समा
नं तत्तृतीयसवनं बृहस्पतिसवेन नाभानेदिष्ठस्त्विह पूर्वो वैश्वदेवा त्तृचाद्वियामरुत्त्वाग्नि
मारुते मारुतांत्तयोरुक्तः शास्योपायः ॥ १० ॥ यस्य पशवो नोपधरेरन्नन्यान्वाभिजनां
निनीत्सेत सोऽस्तोर्यामेण यजेत माध्यंदिने शिल्पयोर्निवर्जं मुक्तो विश्वजितैकाहेन गर्भ
कारं चेत्स्तुवीरंस्तथैव स्तोत्रियानुरूपान्रथंतरेणाग्ने ततो वैराजेन ततो रथंतरेण
बृहद्वैराजाभ्यां वैवमेव वामदेव्यशाक्वरे मैत्रावरुणस्य नोधस वैरूपे ब्राह्मणाच्छंसि
नः श्येतवैरूपे वा कालेय रैवते अच्छावाकस्य सामानंतर्येण द्वौ द्वौ प्रगाथाव गर्भका

२६

रमतिरात्रस्त्विहाद्वेपदोक्थ्यश्चेद्वेषुवतंत्ततीयसवनमूर्ध्वमाश्विनादतिरिक्तोक्था
निंजरोबोधतद्विविड्डिजरमा णः समिद्धसेऽग्निनेद्रेणाभात्यग्निः क्षेत्रस्यपतिना
वयमितिपरिधानीयायुवंदेवाक्रतुनापूर्व्येणेतियाज्यायद्द्यकच्चवृत्रहन्नुद्येदभिश्रु
तामघमानोविश्वाभिः प्रातर्यावाणाक्षेत्रस्यपतेमधुमंतमूर्मिमितिपरिधानीयायु
वांदेवास्त्रयएकादशासइतियाज्यातमिंद्रंवाजयामसिमहांइंद्रोयओजसानूनमश्विना
तंवांरथंमधुमतीरोषधीर्द्यावआपइतिपरिधानीयापनाय्यंतदश्विनाकृतंवामिति
याज्यातोदेवाअवंतुनइतिस्तोत्रियानुरूपौउतनोधियोगोअग्राइतिवाऽनुरूपस्यो
तमेवेद्यावापृथिवीउभाउनूनंदैव्याहोताराप्रथमापुरोहितेतिपरिधानीयाऽयंवांभा
गोनिहितोयजत्रेतियाज्यायदनाधीयात्पुराणमोकः सख्यंशिवंवामितिचतस्रो

सू॰ ३॰ ४

२७

याज्यास्तद्दो गाय सुते सचास्तोत्रमिंद्रायगायत त्यमुवः सत्रासाहं सत्राते अनुकृष्ट
यद्वतिवा स्तोत्रियानुरूपा अपरिमिताः परः सहस्रादक्षिणाः श्वेतश्चाश्वतरी रथो हो
तुर्होतुः॥ ११॥ ॥ इतिश्रौतसूत्रे उत्तरषट्के तृतीयोऽध्यायः॥ ॥ हरिः ॐ ३॥ ॥ ज्योति
र्गौ ऽद्विकामस्य नवसप्तदशाप्रजातिकामस्य विषुवत्स्तोमो भ्रातृव्यवतो गो रक्षिजि
च्च गोरू मयसामा सर्वस्तोमो बुभूषत आयुर्दीर्घव्याधेः पशुकामस्य विश्वजिद्ब्रह्म
वर्चसकामवीर्यकामप्रजाकामप्रतिष्ठाकामानां पृष्ठ्याहान्यादितः पृथक्कामे
रि त्यतिरात्रास्तेषामाद्यास्त्रयऐकाहिकरास्यां इत्येकाहा अथाहीनां घ्यहप्रभृ
तयो द्वादशरात्रपराध्या अग्निष्टोमादयो तिरात्रांता मासापवर्गा अपरिमाणदी
क्षा ऐकाहा श्वेतरेयिणः साहस्रदाश्वदक्षिणा अतिरात्राँश्च सर्वदाः स्तत्राद्भासं

२७

साम

ख्याः संख्याताः षळहां ता अभिप्लवाद्‌ तिरात्रस्त्वंस्यः संख्यापूरणो गृहीतानांहानो
वैश्वानरोधिकः॥ ३॥ आंगिरसंस्वर्गकामोयोवापुण्योहीनोनुप्रेप्सुः स्यात्त्वैत्ररथ
मन्नाद्यकामः कापिवनंस्वर्गकामइतिद्व्यहाः प्रथमस्यत्तरस्याह्नस्तात्तृयं तृतीय
सवनं त्वंहिक्षैतवदिति चाज्यंगर्गत्रिरात्रंस्वर्गकामस्तस्यमध्यमस्याह्नोवामदेव्यं
पृष्ठं विश्वोविश्वीयमग्निष्टोमंवारवंतीयमुत्तमेत्वमग्नेवसूँ रितिचाज्यंबैदत्रिरा
त्रंराज्यकामः सर्वेत्रिवृतोतिरात्राश्छंदोमपवमानात र्वस्वपशुकामः पराक्‌छंदोम
पराकोस्वर्गकामइतित्र्यहांगर्गत्रिरात्रत्रास्याअत्रेश्चतुर्वीरंवीरकामस्तस्यवीर
वंत्याज्यानियमग्नेवाजसातमेतिद्वितीयेहन्याज्यमग्नायोमर्त्यइतितृतीये
ग्निंनरइतिचतुर्थे षोळशिमच्चतुर्थंतस्याभित्वावृषभासुतइतिगायत्रीषु

भ्रात व्यवान्प्रजा कामो वसिष्ठ संसर्प मिति चतुरहाः सार्वसेनं पशुकामो दैवं २

सू.३.४

२८

रथंतरं पृष्ठमनुष्टु ब्बृहती षु बृहच्चतुर्थे त्वंवलस्य गोमतो यज्ञायथा अपूर्व्येतिवा
जामदग्नं पुष्टिकामस्तस्य पुरो रुक्चाग्नि न्य उपसदो वैश्वामित्रं भ्रात व्यवान्पंचशा
रदीयं पशुकामो व्रतवंतमायुष्कामो बाबरं वाक्प्रवदिषुरिति पंचपंचरात्राः पंच
शारदीयस्य तु सप्तदशोक्षाणो ऐंद्रामारुता मारुती भिः सहवत्सतरीभिः सप्तदशाभिः
सप्तदशाभिः पंचवर्षपर्यग्निकृताः सवनीयास्तेषां त्रीस्त्री श्चतुर्थेहः स्यालम्भरन्
पाशशिष्टान्पंच पंचमे व्रतवतस्तु तृतीयस्याह्नस्थाने महाव्रतं पृष्ठ्यपंचाह उत्तमः॥
॥२॥ ऋतूनां षडहं प्रतिष्ठाकामः पृष्ठ्यः समूह्णो व्यूह्ळो वा पृष्ठ्यावलंबं पशु
कामः पृष्ठ्यपंचाहो भ्यासक्तो विश्वजिच्च संभार्यमायुष्कामः पृष्ठ्यत्र्यहः पूर्वो
भिप्लवत्र्यहश्च ऋषि सप्तरात्रमृद्धिकामः प्राजापत्यं प्रजाकामश्छंदोमपव

२८

मानव्रतंपशुकामो जामदग्नमन्नाद्यकामं एते चत्वारः पृष्ठ्यो महाव्रतं च व्रतं तु सर्वस्तोमं
प्रथमे सप्तदशं द्वितीये छंदोमपवमानं तृतीये चतुर्विंशो बहिष्पवमानः सप्तदशाः शेष
श्चतुर्थ ऐंद्रमत्यन्याः प्रजाबुध्नः षट्त्रिककुका अभिजिद्विश्वजिन्महाव्रतं सर्वस्तोमो
जनकसप्तरात्रमृद्धिकामो ऽभिप्लव चतुरहो विश्वजिन्महाव्रतं ज्योतिष्टोमः पृष्ठ्यस्तोमो वि
श्वजिच्चपशुकामस्य सप्तमो द्वैवत्वमीप्सतो ऽष्टरात्रः पृष्ठ्यो महाव्रतं ज्योतिष्टोमो नवरा
त्रमायुष्कामः पृष्ठ्यस्त्रिककुकाश्च त्रिककुकाः पृष्ठ्यावलंब इति पशुकामस्येति नवरा
त्रौ त्रिककुबध्यर्द्धः पृष्ठ्यो महात्रिककुप्पूर्व्यस्त्वको नवरात्रः समूळ्हस्त्रिककुप्स
मूळ्हश्चतुष्टोमस्त्रिककुबध्यर्द्धो ऽभिप्लवं एतैश्चतुर्भिः स्वानां श्रैष्ठ्यकामोय
जेत कुसुरुबिंदुमृद्धिकामस्त्रयाणां पृष्ठ्याक्रामे केकं त्रिश्छंदोमवंतं पशुकामः

पृष्ठ्यावलंबस्य प्राग्विश्वजितश्छंदोमादशमं चाहः पुराभिचरं ज्योतिर्गामभितो गो
रभिजितं विश्वजिदायुषं शालली पिशंगं श्रीकामोऽभिप्लवत्र्यहः पूर्वास्त्रिरिति दशरा
त्राः ॥३॥ पौंडरीकमृद्धिकामः पृष्ठ्यस्तोमश्छंदोमा गोतमस्तोमो विश्वजिद्व्यूळ्हो नव
रात्रो महाव्रतं वैश्वानर इति वाऽथ संभार्यावतिरात्रश्चतुर्विंशं मध्यर्द्धौ अभिप्लवः पृष्ठ्यो
वेद्वज्ज्रंभात व्यवानं पृष्ठ्यस्याद्ये त्र्यहनी व्यत्यासं मानवरात्रान्महाव्रतं ॥४॥ अथ द्वा
दशाहा भवेयुः सत्राणि भवेयुरहीना वोक्तो दशरात्रः समूळ्हो व्यूळ्हो वा तमभितोऽति
रात्रौ संभार्ययोर्वा वैश्वानरमुपदध्यात्संवत्सरप्रवल्हं श्रीकामोऽतिरात्रश्चतुर्विंशं
विषुवद्वर्जो नवरात्रो महाव्रतमथ भरतद्वादशाहं इममे वैकाहं पृथक्संस्थाभि
रूपेयुरतिरात्रमग्रेथाग्निष्टोममथाष्टाउक्थ्यानथाग्निष्टोममथातिरात्रमि
ति द्वादशाहास्तेरात्मना बुभूषंतः प्रजया पशुभिः प्रजनयिष्यमाणाः स्वर्गलोक

मेष्यंतः स्वानांश्रैष्ठ्यमेच्छंतु उपेयुर्वा यजेतवेति पृथक्त्व मथसामान्यमपरिमितु
त्वाद्धर्मस्य प्रदेशान्वक्ष्यामो यथाहिपरिमितावर्णा अपरिमितांवा चोगतिमाप्नुवं
त्येवमेव परिमितानामङ्गामपरिमिताः संघाताः सिद्धानित्वहानि तेषांयः कश्चस
माहारः सिद्धमेवशास्यमक्रांतु संशये स्तोमपृष्ठसंस्थाभिरेकैव्यवस्थांतदह्नस्त्वं दृ
ष्ट्वाद्यतिक्रमस्य छंदोगैरेवह्नत्वांसमयमङ्गो बार्हतरथंतरतायामेकाहेनशास्यंश
थंतराणांद्वितीयेनाभिप्लविकेन बार्हतानामपिवाकयाश्चुभीयतदिहासीयेएवंनिविद्धा
नीयेस्यातामैकाहिकमितरत्॥ ५॥ सर्वान्कामानाप्स्यन्त्सर्वाविजितीर्विजिगी
षमाणः सर्वाव्युष्टीर्व्यसिष्यन्नश्वमेधेनयजेतां श्वमुत्स्रक्ष्यन्निष्टीश्यांयजे
तांग्निर्मूर्द्धन्वानिविराजोसंयाज्येपोष्णीद्वितीयां त्वमग्नेसप्रथा असिसोमया

स्तेमयो भुव इतिसद्वंतौ त्वां चित्रश्रवस्तमयद्वा हि ष्ठंतदग्नय इतिसंयाज्ये अश्वमुत्स
ज्यरक्षिणो विधाय सावित्र्यास्तिस्त्र इष्टयोऽहरहर्वैराजतंत्राः सविता सत्य प्रसवः प्र
सविता सवितायइमा विश्वा जाता न्यादेवो यातुसविता सुरत्नः सघानोदेवः सवितास
हावेति द्वेसमाप्ता सुसमाप्तासु दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोभिषि
क्तायपुत्रामात्यपरिवृतायराज्ञेपारिप्लवमाचक्षीत हिरण्मये कूर्चेऽध्वर्युरासीनः प्र
तिगृणात्याख्यास्यन्नध्वर्यवित्याह्वयीत होहोतरितीतरः॥६॥ प्रथमेहनि मनुर्वै
वस्वतस्तस्यमनुष्याविशस्तइमआसतइतिगृहमेधिनउ पसमानीताःस्युस्ता
नुपदिशत्यृचोवेदः सोयमितिसूक्तं निगदेद्द्वितीयेहनियमो वैवस्वतस्तस्यपि
तरो विशस्तइम आसतइति स्थविरा उपसमानीताःस्युस्तानुपदिशतियजुर्वेदो

30

वेदः सोयमित्यनुवाकं निगदेत्तृतीयेहनि वरुण आदित्यस्तस्य गंधर्वा विशस्त इम आसत इति युवानः शोभना उपसमानी तास्युस्तानुपदिशत्यथर्वाणो वेदः सोयमितियज्ञ्भेषजं निशांतं स्यात्तं निगदेच्चतुर्थेहनि सोमो वैष्णवस्तस्याप्सरसो विशस्ता इमा आसत इति युवतयः शोभना उपसमानी तास्युस्ताउपदिशत्यांगिरसो वेदः सोयमितियद्घोरं निशांतं स्यात्तं निगदेत्पंचमेहन्यर्बुदः काद्रवेयस्तस्य सर्पा विशस्त इम आसत इति सर्पाः सर्पविद इत्युपसमानी ताः स्युस्तानुपदिशति विषविद्या वेदः सोयमिति विषविद्यां निगदेत्षष्ठेहनि कुबेरो वैश्रवणस्तस्य रक्षांसि विशस्तानीमान्यासत इति सेलगाः पापकृत इत्युपसमानी ताः स्युस्तानुपदिशति पिशाचविद्या वेदः सोयमिति यत्किंचित्पिशाचसंयुक्तं निशांतं स्यात्तन्निगदेत्सप्तमेहन्यसितो धा

स्रू·उ·४
३१
31

न्वस्तस्यासुराविशस्तइमआसतइतिकुसीदिनउपसमानीताःस्युस्तानुपदिशत्यसु
रविद्यावेदः सोयमितिमायां कांचित्कुर्यादष्टमेहनिमत्स्यः सांमदस्तस्योदकेचराविश
स्तइमआसतइतिमत्स्याः पुंजिष्ठाइत्युपसमानीताःस्युस्तानुपदिशतिपुराणविद्या
वेदः सोयमितिपुराणमाचक्षीत नवमेहनिताक्ष्योवैपश्यतस्तस्यवयांसिविशस्ता
नीमान्यासतइतिवयांसिब्रह्मचारिणइत्युपसमानीताःस्युस्तानुपदिशतीतिहा
सोवेदः सोयमितीतिहासमाचक्षीतदशमेहनिधर्मइंद्रस्तस्यदेवाविशस्तइमआस
तइतियुवानःश्रोत्रियाअप्रतिग्राहकाइत्युपसमानीताःस्युस्तानुपदिशतिसाम
वेदोवेदः सोयमितिसामगायादेवमेतत्पर्यायशः संवत्सरमाचक्षीतदशमीदशमीं
समापयन्त्संवत्सरांतेदीक्षेत॥७॥त्रीणिसुत्यानिभवंतिगोतमस्तोमः प्रथमंद्वितीं

३१

यस्याङ्गः पशोरुपाकरणकालेऽश्वमानीय बर्हिर्वेद्यास्तावेवास्थापयेयुः सचेदव
घ्रायादुपवर्त्तेतवायज्ञसमृद्धिं विद्यांनचेत्स्तुगव्यं नोवाजी सचश्व्यमिति यजमानंवा
चयेत्तमवस्थितमुपाकरणाययदक्रंदइत्येकादशाभिः स्तोत्यप्रणुवन्ननुस्वाध्या
यमित्येकेऽध्रिगोशमीध्वमितितिशिष्टूंषड्विंशातिरस्यवंक्रयइतिवामानोमित्रइत्या
वपेतोपप्रागाच्छसनंवाज्यर्वेतिच द्वे संज्ञप्तमश्वंपत्न्योधून्वंतिदक्षिणान्केशाप
क्षानुद्भूथ्येतरान्नुभच्चत्यसव्यान्नूरुनाघ्नानां अथास्मैमहिषीमुपनिपातयंतितां
होताभिमेथतिमाताचतेपिताचतेऽग्रेवृक्षस्यक्रीळतः॥ प्रतिळानीतितेपितागभे
मुष्टिमतंसयदितिसाहोतारंप्रत्यभिमेथत्यनुचर्यश्चशतंराजपुत्र्योमाताच
तेपिताचतेग्रेवृक्षस्यक्रीळतः॥ यीयपूयतइवतेमुखंहोतर्मात्वंवदोबक्तिति

य.३.४
३२

वावातां ब्रह्मोर्ध्वमिनामुच्छ्रयतागिरौ भारंहरन्निव॥ अथास्यैमध्यमेजतु शीतेवाते पुनर्न्निवेति सा ब्रह्माणं प्रत्यभिमेथत्यनुचर्यश्चशतंराजपुत्र्यं ऊर्ध्वमेनमुच्छ्रयतगिरौ भारंहरन्निव॥ अथास्यमध्यमेजतु शीतेवातेपुनर्न्निवेति सदः प्रसृप्य स्वाहाकृतिभिश्चरित्वा॥८॥ ब्रह्मोद्यंवदंति कः स्विदेकाकी चरति क उ स्विज्जायतेपुनः॥ किंस्विद्धिमस्यभेषजं किं स्विदावपनंमहदितिहोताध्वर्युं पृच्छति सूर्यएकाकी चरति चंद्रमाजायतेपुनः॥ अग्निर्हिमस्यभेषजं भूमिरावपनंमहदितिप्रत्याह किंस्वित्सूर्यसमंज्योतिः किंसमुद्रसमंसरः॥ कः स्वित्पृथिव्यैवर्षीयान्कस्यमात्रानविद्यतइत्यध्वर्युर्होतारंपृच्छति सत्यंसूर्यसमंज्योतिर्द्यौः समुद्रसमंसरः॥ इंद्रः पृथिव्यैवर्षीयान्गोस्तुमात्रानविद्यतइतिप्रत्याह पृच्छामित्वाचितयेदेवसखयदित्वमत्रम

३२

नसाज गंथ॥ केषु विष्णु स्त्रिषु पदेष रुछः केषु विश्वं भुवन माविवेशोति ब्रह्मोज्ञातारं
पृच्छ स्यापितेषु त्रिषु पदेष्व स्मिं येषु विश्वं भुवन माविवेश॥ सद्यः पर्येमि पृथिवी मु
त द्यामे के नांगेन दिवोऽस्य पृष्ठ मिति प्रत्याह केष्वंतः पुरुष आविवेश कान्यंतः
पुरुष आर्पितानि॥ एत द्ब्रह्मन्नुपवल्हामसित्वा किं स्विन्नः प्रतिवोचास्यत्रेत्यु
ज्ञाता ब्रह्माणं पृच्छति पंचस्वंतः पुरुष आविवेश तान्यंतः पुरुष आर्पितानि॥ ए
तत्वात्र प्रतिवन्चानो अस्मि नमायया भवस्युत्तरो मदिति प्रत्याह श्रांच मुपनि
ष्क्रम्यै केक शोयजमानं पृच्छं ति पृच्छामि त्वा परमंतं पृथिव्या इतीयं वेदिः परो
अंतः पृथिव्या इति प्रत्याह महिम्ना पुरस्ता उपरिष्टा च्चवपा नां चरंति सुभूः
स्वयंभूः प्रथममंतर्महत्यर्णवे॥ दधेह गर्भमृत्वियं यतो जातः प्रजापतिः॥ हो

सू. ३.४

३३

तायक्षत्प्रजापतिंमहिम्नोजुषतांवेतुपिबतुसोमंहोतर्यजेतिप्रैषस्त्वेमेलोकाःप्रदि
शोदिशश्चेतियाज्याऽश्वोजस्तूपरोगोमृगइतिप्राजापत्यावैश्वदेवीकृप्तिरितरेषांपशू
नांप्रचरंतिपंचमेनपृष्ठ्याह्नाशस्यंव्यूळ्हस्य॥२॥तस्यविशेषान्वक्ष्यामोऽग्निंतं
मन्यइत्याज्यंतस्यैकाहिकमुपरिष्टात्प्र उगंत्वेचैष्वैकाहिकास्तृचास्त्रिकद्रुकेषुमहि
षोयवाशिरमितिमरुत्वतीयस्यप्रातिपदेकात्चरूथानेऐकाहिकोनुचरःसूक्तेषुचां
त्यमुद्धृत्यैकाहिकमुपसंशास्यंतस्मिन्निविदंदध्याद्देवंनिष्केवल्येऽभित्यंदेवंसविता
रमोण्योःशितिवैश्वदेवस्यप्रातिपदेकात्चरूथानेऐकाहिकोनुचरःसूक्तेषुचैकाहिकान्यु
पसंशास्यंतेषुनिविदोदध्याद्देवमेवाग्निमारुतेचतुर्थंपृष्ठ्याहरुत्तमंज्योतिर्गौरा
युरभिजिद्विश्वजिन्महाव्रतंसर्वस्तोमोप्तोर्यामोवाभूमिपुरुषवर्जमब्राह्मणा

३३

नां वित्ता॥ ... रात्रमतिग्म्योः ... वे ... ग्घोतुर्दक्षिणाब्रह्मणः प्रतीच्य
ध्वर्यौः ... ज्ञातुरेताएवहोत्र ... यत्ताः॥ १०॥ ॥ इत्याश्वलायन
श्रौतसूत्रे ... चतुर्थोध्यायः॥ ... ॥ अथैतेषामङ्गांयोगविशेषान्
वक्ष्यामोपक्थायुक्तानियसमेयस्मे ... वेकाहोतिरात्रे आदेशाय
णीयएषां ... नीयोव्यक्तोम ... पदिकात ... चान्तरएषएवतावंतरेणव्यूढो
दशरात्रेएष ... तः सत्राणांतत्रा ... र्ध्वंदशरात्राद्देकाहार्थेमहाव्रतं
प्रागदशरात्रादितरेषामङ्गांद्यहार्थेगोअ ... यहार्थेत्रिकद्रुकाअभिप्लवत्र्य
हंपूर्वंत्रिकद्रु ... चक्षते चतुरहा ... त्रिकद्रुकामहाव्रतंचपंचाहार्थेअभिप्ल
वपंचाहउत्तम ... पृष्ठात्तृती ... सवनं ... हार्थेअभिप्लवः षळहएवं न्याया

स्त्र·उ·५
·४

आवापाः षळहांताः पुनः पुनः पूर्णः पूर्णश्च षळहस्तंत्रतामेवगच्छति ॥१॥ द्वौत्र
योदशरात्रावह[illegible]नां प्रथमं पृष्ठ्यं छंदोमैश्चांतरा सर्वस्तोमोतिरात्रो न्याय
क्लृप्तं व्रतवंतं प्रतिष्ठा[illegible]मा द्वितीयं त्रीणि चतुर्दशरात्राणि सार्वकामिकं प्रथमं द्वौ पृष्ठ्या
वावृत्त उत्तरं स्त्रस्त्येवोदके वा विवाहे वा मीमं[illegible]नां द्वितीयं पृष्ठ्यमभितस्त्रिककु
कौ न्यायक्लृप्तं मतिः उपजनं प्रतिष्ठाकामस्य दकात[illegible]ीयं चत्वारि पंचदशरात्राणि द्वैवत्व
मीमांसितां प्रथमं प्रथमस्य चतुर्दशरात्रस्याग्निविदंद[illegible]मध्ये महाव्रतं ब्रह्मवर्चसकामा
द्वितीयं द्वितीयस्य चतुर्दशरात्रस्याश्चतुष्टोमायणीयादनंतरः सात्राहीनिकाउ
भौ लोकावाप्स्यतां तृतीयं तृतीयस्य चतुर्दशरात्रस्याग्निष्टुत्प्रायणीयस्था
नै न्यायक्लृप्तस्त्र्यहोपजनः स सर्वा न्यायक्लृप्तं त्र्यहोपजनं प्रतिष्ठाकामाश्च

३४

तुर्थं षोळशरात्रं चतूरात्रोपजनमन्नाद्यकामाः सप्तदशरात्रं पंचरात्रोपज
नं पशुकामा अष्टादशरात्रमायुष्कामाः षळहश्चात्र पूर्य तेसतंत्रस्योपजनंव
क्ष्यामः एकान्नविंशतिरात्रमेकरात्रोपजनं ग्राम्यानारण्यान्पशून्नवरुरुत्स
मानां विंशतिरात्रं प्रतिष्ठाकामा वा [illegible] द्विश्वजितावभिप्लवा इद्धं ॥ २॥ द्वावेक
विंशतिरात्रौ प्रतिष्ठाकामानां प्रथम [illegible] गाम भिप्लवानां प्रथमावंतरातिरा
त्रौ ब्रह्मवर्चसकामा द्वितीयं नवरात्रस्याभिजिद्विश्वजितो स्थाने द्वौष्टष्यावा
वृत्त उत्तरः संवत्सरसंमिताइत्याचक्षते द्वाविंशातिरात्रं चतूरात्रोपजनमन्ना
द्यकामास्त्रयोविंशतिरात्रं पंचरात्रोपजनं पशुकामा द्वौ चतुर्विंशतिरात्रौ प्र
जातिकामाः पशुकामा वा प्रथमं षळहश्चात्र पूर्य तेसतंत्रस्योपजनंवक्ष्यामः

स्र॰ ३.५
३५

स्वर्गे लोके वत्स्यंतो ब्रध्नस्य विष्टपं रोक्ष्यंतो द्विती यं पृष्ठ्यस्तोम स्त्रय स्त्रिं शो निरु
क्तो विशालः पृष्ठ्यस्तोमा एक विंशास्त्रिणव स्त्रयस्त्रिंशाः प्रतिलोमाः पूर्व स्मिं स्त्र्यहे नु
लोमा उत्तरस्मि न्त्स विशालोऽपि वोत्तर एव त्र्यहे प्रतिलोमोऽनुलोमश्चा निरुक्तम
हरावृत्तः पृष्ठ्यस्तोमस्त्रिवृद निरुक्तो ज्योतिरुभयसामा संसद्मयन मित्येतद
चक्षते पंचविंशतिरात्रमेक रात्रोपजननम न्नाद्यकामाः षड्विंशतिरात्रं द्विरात्रोप
जननं प्रतिष्ठाकामाः सप्तविंशतिरात्रं त्रिरात्रोपजननमृद्धिकामा अष्टाविंशतिरात्र
चतूरात्रोपजननं ब्रह्मवर्चसकामा एकान्नत्रिंशद्रात्रं पंचरात्रोपजननं परमां विजि
तिं विजिगीषमाणास्त्रिंशद्रात्रमन्नाद्यकामाः षडहश्चात्र पूर्यते सतंत्रस्योप
जननं वक्ष्याम एकत्रिंशद्रात्रमेकरात्रोपजननमन्नाद्यकामा द्वात्रिंशद्रात्रं द्विरात्रो

३५

पजनं प्रतिष्ठाकामाः ॥३॥ त्रीणि त्रयस्त्रिंशद्रात्राणि प्रतिष्ठाकामानां प्रथमं त्रयाणा
मभिप्लवानामुपरिष्टादुपरिष्टादतिरात्रो ब्रह्मवर्चसकामा द्वितीयं चतुर्णां पंचरात्रा
णां मा द्युत्तउत्तमउत्तमो चांतरा सर्वस्तोमोतिरात्रउभौ लोकावाप्स्यतां तृतीयं षण्णां
पंचरात्राणां मध्ये विश्वजिदतिरात्र आवृत्तास्त्वत्तरे त्रयश्चतुस्त्रिंशद्रात्रं च
तूरात्रोपजननमन्नाद्यकामाः पशुकामानामुत्तराणि चत्वारि पंचत्रिंशद्रात्रः पं
चरात्रोपजनः षट्त्रिंशद्रात्रे षळहउपजायते स तंत्रस्योपजनं वक्ष्यामः स
प्तत्रिंशद्रात्र एकरात्रोपजनो ऽष्टात्रिंशद्रात्रो द्विरात्रोपजनं एकान्नचत्वारिंश
द्रात्रं त्रिरात्रोपजननमनंतां श्रियमिच्छंतश्चत्वारिंशद्रात्रं चतूरात्रोपजनं प
रमायां विराजि प्रतितिष्ठंत एकचत्वारिंशद्रात्र प्रभृतीन्युत्तराणि न्यायेनोष्टा

स्व·३·५

३६

36

चत्वारिंशद्रात्रात्पंचाशद्रात्रप्रभृतीनि च षष्टिरात्राद्द्विषष्टिरात्रप्रभृतीनि चैको
नशतरात्रात्तत्रैकरात्रचतूरात्रोपजनानि भवंति ॥४॥ सप्तैकान्नपंचाशद्रात्राणि
विपाप्मनावत्स्यंतः प्रथममतिरात्रस्त्रीणि त्रिवृंत्यहान्यतिरात्रो दश पंचदशान्यति
रात्रो द्वादश सप्तदशान्यतिरात्रः पृष्ठ्योऽतिरात्रो द्वादशैकविंशान्यतिरात्रस्त्रिवृतां
प्रथमोऽग्निष्टोमः षोळश्युत्तमः पंचदशानामुक्थ्या इतरे विधृतय इत्याचक्षते
यमातिरात्रं यमां द्विगुणामिव श्रियमिच्छंतो द्वावभिप्लवौ गो आयुषी अतिरात्रौ
द्वावभिप्लवावभिजिद्विश्वजितावतिरात्रौ वैको भिप्लवः सर्वस्तोमनवसप्तदशाव
तिरात्रौ महाव्रतं स्वानां श्रैष्ठ्यकामास्तृतीयं चतुर्णां पृष्ठ्यानामेकैकं नवकृत्वोऽन
ववर्गाणां प्रथमषष्ठसप्तमोत्तमान्यहान्यग्निष्टोमा उक्थ्या इतरे महाव्रतं सवि

३६

तुः ककुभ इत्याचक्षते ॥ ५ ॥ त्रयाणामुत्तरेषां न्यायक्लृप्ता अभिप्लवाः प्रथमस्य
त्र्यूर्ध्वं चतुर्थात्सर्वस्तोमो ऽतिरात्र उपसत्सु गार्हपत्ये गुग्गुलुसुगंधितेजनपैतुदारु
भिः पृथक्सर्पिषि विपच्यानुसवनं संनेषु नारात्रीं सेष्वां जीरन्नभ्यंजीरं श्चेये
वर्चसा न भायुर्ये वा त्मानं नैव जानीरं स्त एता उपेयु रांजनाभ्यंजनीया इत्याच
क्षते एता एव प्रतिष्ठाकामानां मांजनाभ्यंजनवर्जमेतासामेव सर्वस्तोमस्थाने महाव्र
तमैंद्र मत्यन्याः प्रजा बुभूषंत एतासामेव सर्वस्तोममुद्धृत्य यथास्थानं महाव्रतं
संवत्सरकामानाप्स्यंत उत्तममतिरात्रश्चतुर्विंशं त्रयो ऽभिप्लवा नवरात्रो ऽभिप्ल
वौ गो आयुषी दशरात्रो व्रतिममतिरात्रः संवत्सरसंमिता इत्याचक्षते एकषष्टिरात्रं
प्रतिष्ठाकामा एतासामेव पृष्ठ्यावभितो नवरात्रं तयोरावृत्त उत्तरः शतरात्रमायु

स्रः ३.५ कामांश्चतुर्दशाभिप्लवांश्चतुरहोपजनादितिरात्रिसत्राणि॥६॥ अथगवामयनंसर्व
३७ कामाः प्रायणीयचतुर्विंशेउपेत्य चतुरभिप्लवान्पृष्ठ्यपंचमान्पंचमासानुपयं
त्यथषष्ठंसंभरंतित्रीनभिप्लवान्पृष्ठ्यमभिजितंस्वरसाम्नइत्याद्याभ्यांपूर्यंते
होभ्यामितिनुपूर्वंपक्षोथविषुवानेकविंशोनपूर्वस्यपक्षसोनोत्तरस्यावृत्ताःस्व
रसामानःषळहाश्चोत्तरस्यपक्षसः स्वरसाम्नोविश्वजितंपृष्ठंत्रीनभिप्लवानिति
सप्तमंद्विरात्रोनंकृत्वाऽथपृष्ठ्यमुखांश्चतुरभिप्लवांश्चतुरोमासानुपयंत्यथो
त्तमंसंभरंतित्रीनभिप्लवान्गोआयुषीदशरात्रंव्रतोदयनीयाभ्यांसप्तमःपूर्य
तइतिन्वेकसंभार्यमुत्तरंपक्षोऽथद्विसंभार्यंव्रतोदयनीयेएवोत्तमस्यगोआ
युषीसप्तमस्यगोआयुषीवाविहरेयुर्गाविश्वजितोनंतरमायुषंपूर्वंदशरात्रा

३७

दपिवोर्ध्वं विश्वजितः सप्तमं सवनमासं कृत्वोद्धरेयुर्गो आयुषी दशरात्रं चापि वोत्त
रस्य पक्षसो हान्ये वावर्त्तेरन्ननुलोमाः षळहाः स्युः षळहा वावर्त्तेरन्ननुलोमा न्यहा
नीति गवामयने सर्वे वा षळहाः स्युरभिप्लवाः स्युरभिप्लवाः स्युः ॥ ७॥ ॥ इत्याश्वला
यनश्रौतसूत्रे उत्तरषट्के पंचमोऽध्यायः॥ ॥ हरिः ॐ ॥ ॥ गवामयनेनादित्यानाम
यनं व्याख्यातं सर्वे त्वभिप्लवास्त्रिवृत्पंचदशा मासाश्च पृष्ठ्यमध्यमा नवषष्ठस
प्तमोत्तमान्वर्जयित्वा बृहस्पतिसवेंद्रस्तुतो चाभिजिद्विश्वजितो स्थाने सप्तमस्य
च मासस्योत्तमयोरभिप्लवयो स्थाने त्रिवृद्यूक्तोऽदशरात्र उड्डि दुलभिदो चोत्तम
स्य च मासस्याद्यो येऽभिप्लवास्त्रय उद्धृत्य तेषां मध्यममथ स्युः पृष्ठ्यमध्यमाः स
मूळ्क्तो दशरात्रः॥ १॥ आदित्यानामयनेनांगिरसामयनं व्याख्यातं त्रिवृतस्त्वभि

स्र०३।६
३८

प्लवाः सर्वेपृष्ठ्यादयश्चांद्रामासाः पंचपूर्वस्यपक्षसश्चत्वारस्त्तरस्यपृष्ठ्यांताअ
ष्टमाद्यउत्तमस्यचमासस्योदोयेषळहास्त्रयः पृष्ठ्यांताएवतेपिस्युः पूर्वौस्याता
मभिप्लवौ॥२॥ इतिवातवतोरयनंप्रायणीयोतिरात्रस्त्रिवृतामासंपंचदशेनमासं
सप्तदशेनमासमेकविंशेनमासंत्रिणवेनमासंत्रयस्त्रिंशेनमासंव्रतंविषुवत्
स्थानेएतैरेवमासैः प्रतिलोमैः पक्षउत्तरमुदयनीयोतिरात्रएतेषामेवाक्षामति
रात्राविल्यपरंमन्यत्राप्याद्दिष्टैः कालपूरणेनचेत्संस्था नियमः॥३॥ कुंडपायिनाम
यनंमासंदीक्षिताभवंति तेमासिसोमंक्रीणंतितेषांद्वादशोपसदोभवंति सोमम्रु
पनह्यप्रवर्ग्यपात्राण्युत्साद्योपनह्यवामासमग्निहोत्रंजुह्वति मासंदर्शपूर्ण
मासाभ्यांयजंतेमासंवैश्वदेवेनमासंवरुणप्रघासैर्मासंसाकमेधैर्मासंशुना

३८

38

सीरीयेणयदहर्मासःपर्यते तदहरिष्टिं समाप्याऽग्निप्रणयनादिधर्मोत्सादनादिवौ
पवसथिकं कर्मकृत्वाश्वोभूते प्रसुनुयुस्तद्धैक उपसज्ज्य एवानंतरं कुर्वंति तथादृष्ट
त्वात्सौत्यान्मासान अग्निहोत्रादीन्चदत्तस्तदनुपपन्नं पश्चर्थंत्वग्निप्रणयनं तस्य
चश्वः सुत्यानिमित्तमतिप्रणीतचर्यायांचवैगुण्यं दर्शपूर्णमासयोस्तथाग्नि
होत्रस्यं सदोहविर्द्धानान्याग्नीध्रीयाग्नीषोमप्रणयनं वसतीवरीग्रहणानिपश्वर्थानि
निभवंति सुत्यार्थान्येके तत्कालाश्चैवतत्कुणाः सिद्धस्वभावानौनव्यवधानादन्यत्वं
यथादृष्ट्याभिन्नवयोः सगुणानांह्येवकर्मणां मुद्गार उपजनोवासुब्रह्मण्यात्वत्यंत
मनवध्यतेहकालसंज्ञायत्वादुत्सर्गमेके सुत्योपसत्कुणत्वात्क्रियात्वेवप्रवृत्ते ह्यंत
मगत्वाँ वस्त्रानेदोषस्त्रिवृता मासं पंचदशेन मासं सप्तदशेन मासमेकविंशेन मासं

स्रू॰ ३॰ ६
३९

त्रिणवेन मासं सष्टादशेन त्रयस्त्रिंशानि द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च सर्वेण यज्ञेन यजंते य एत दुपयंति ॥ ४ ॥ सर्पाणामयनं गोआयुषी दशरात्रस्तोमे अनुलोमे षण्मासा न्प्रतिलोमेषडू ज्योतिर्दशरात्रस्तोमो विषुवत स्थानेऽप्रकाशकामा उपेयुस्त्रैवर्षिकं प्रजाकामा गवामयनं प्रथमः संवत्सरो ऽथादित्यानामयनं आंगिरसां चत्वारि तापश्चितानि क्षुल्लकतापश्चितं प्रथमं संवत्सरं सदीक्षोपसत्कं तस्य चत्वारः सौत्यामासा गवामयनस्य प्रथमषष्ठसप्तमोत्तमास्त्रैवर्षिकं तापश्चितं तस्य सौत्यः संवत्सर उक्तो गवामयनेन ज्योतिर्गौरायुरभिजिद्विश्वजिन्महाव्रतं चतुर्विंशानां वै केकं द्वादशावर्षिकं तापश्चितं तस्य चत्वारः सौत्याः संवत्सरा गवामयनशास्याः पूर्वेणैवं न्यायेनाऽपि वोत्तरस्य पक्षसो द्वाविंशातिः सवनमासाभ

३९

वेयुस्त्रयोविंशतिः पूर्वस्यषट्त्रिंशद्वर्षिकंमहातापश्चितंतस्यद्वादशसोत्याः संवत्सरा
गवामयनंशस्याः पूर्वेणैवंन्यायेन [illegible] प्रजापतेर्द्वादशसंवत्सरंत्र
यस्त्रिवृतः संवत्सरास्त्रयः पंचदशास्त्रयः सप्तदशास्त्रयएकविंशाएतैरेवस्तोमैः शा
क्त्यानां षट्त्रिंशद्वर्षिकमेकैकेननवनववर्षाण्येतैरेवस्तोमैः साध्यानांशतसंवत्स
रमेकैकेनपंचविंशतिः पंचविंशतिर्वर्षाण्येतैरेवस्तोमैर्विश्वसृजांसहस्रसंवत्सर
मेकैकेनाईत्ततीयान्यईत्ततीयानिवर्षशतान्यग्नेरग्निष्टोमसहस्रंसहस्रसाव्य
मित्येतदाचक्षते॥५॥ अथसारस्वतानिसरस्वत्याः पश्चिमउदकांतेदीक्षेरंस्तेत
त्रैवदीक्षोपसदःकृत्वाप्रायणीयंचसरस्वतींदक्षिणेनतीरेणशम्याप्रासेशम्या
प्रासेऽहरहर्यजमानाअनुव्रजेयुः संहार्यउलूखलबुध्नोयूपश्चक्रीवंतिसद्योहवि

स्र·उ·६
४०
40

र्द्धनान्याग्नीध्रीयंपत्नीशालंचदक्षिणपुरस्तादाहवनीयस्यावस्थायब्रह्माशाम्यां
प्रहरेत्सायत्रनिपतेत्तद्गार्हपत्यस्यायतनंततोधिविहारोविषमेचेन्निपतेउद्धृत्य
समेविहरेयुरप्सुचेद्वारुणंपुरोडाशंनिर्वपेयुरपांनप्त्रेचरुमपांनपादाद्यस्थाउ
पस्थंसमन्यायंत्युपयंत्यन्याद्दृत्यातःसमानंसर्वेषांमित्रावरुणयोरयनंकुंडपायि
नामयनस्यांद्याऽऽन्षण्मासानावर्त्तयंतोव्रजेयुर्मासिमासिचगोआयुषीउपेयुरायु
रयुग्मेषुगोयुग्मेष्वितिनुप्रथमःकल्पोऽथद्वितीयोयथामावास्यायामतिरात्रस्स्या
त्तथादीक्षेरँस्तेमावास्यायामतिरात्रंसंस्थाप्यतदहरेवामावास्यस्यसान्नाय्यवत्सा
न्पाकुर्युस्तंपक्षमामावास्येनव्रजित्वापौर्णमास्यांगामुपेयुःपौर्णमासेनोत्त
रंव्रजित्वाऽऽमावास्यायामायुषमुपेयुरेवमावर्त्तयंतोव्रजेयुरिंद्राग्न्योरयनंगो

४०

आयुषीभ्यामर्यम्णोयनं त्रिकद्रुकैः सरस्वतीपरिसर्पण स्यंशास्यमुक्तं गवामय
नेनैकपाती नित्वहान्यतिरात्राः पृष्ठ्याहश्चतुर्थमिति नु गतयोऽर्थोत्थाना निला
क्षंप्रस्नवणंप्राप्योत्थानं तेयमुनायां कारपचवेऽवभृथमभ्युपेयुरुदेत्याग्नये
कामायेष्टिं वैराजतंत्रांतस्यामश्वांच पुरुषीं च धेनुके दद्युरेतद्वोत्थानमृषभैकशा
तानांवा गवांसहस्रभावे सर्वस्वज्यान्यां गृहपतिमरणेवाऽऽज्यान्यात्कृत्तिष्ठंतो वि
श्वजितातिरात्रेणोत्तिष्ठेयुर्गृहपतिमरण आयुषां गवा गवांसहस्रभाव इति शास्यं ॥
॥६॥ अथ सवनीयाः क्रतुपशवो वा त्यंतमाग्नेयो वैंद्राग्नो वाऽऽग्नेयं वा रथं
तरं पृष्ठेष्वैंद्रं बृहत्पृष्ठेष्वैकादशिनान्वाग्रायणीयोदयनीययोरतिरात्रयोः सम
स्तानालभेरन्नैंद्राग्नमंतर्द्धौ वान्वहं वैकेकशः ऐकादशिनां नत्वेवैकादशिनीं

न्यूनामालभेरन्नेतेनचेत्पश्चयनेनेयुस्तुतीयेहनिदशरात्रस्यद्वात्रिंशतमेकादशि
न्यः संतिछंतेतएतस्मिन्नवरात्रेऽतिरिक्तपश्चूनालभेरन्नेकलंवामनमेकविंशऐं
द्राग्नंत्रिणवेवैश्वदेवंत्रयस्त्रिंशेद्यावापृथिवीयांधेनुंचतुर्विंशेतस्याएववत्संवा
यव्यंचतुश्चत्वारिंशेआदित्यांवशामष्टाचत्वारिंशेमैत्रावरुणीमविवाक्येवैश्वक
र्मणमृषभंमहाव्रतेआग्नेयमुदयनीयेतिरात्रेऽपिवैकादशिनीमेवंत्रयस्त्रिं
शीपूरयेयुरभिजिद्विश्वजिद्विषुवंतिद्वि पश्चूनिःस्युः॥७॥अथसत्रिधर्मादी
क्षणादिपित्र्याणांदेवानांचधर्माणांप्राकृतानांनिवृत्तिःसर्वशाश्चवर्जयेयु
र्ग्रामचर्यांसरणंविवृतस्मयनंस्त्र्यभिहासमनार्याभिभाषणमनृतंक्रो
धमपांप्रगाहणमभिवर्षणमारोहणंचवृक्षस्यनावोवारथस्यवादीक्षिताः

भिवादनं दीक्षितस्त्वोपसदमु भोसुन्वंतोसमस्मिंश्चंताः सर्वा रंभिणमभितस्ततरंवा
सर्वसाम्येयथावयोनत्यगीतवादितान्यन्यांश्चाव्रत्योपाचारान्नचैनान्बाहिर्वे
दिषदोऽभ्याश्रावयेयुर्नेदिकंयानोएवाभ्युदियान्नाभ्यस्तमियात्तेषांचेत्किंचिद
पदोपनमेत्त्वमग्नेव्रतपाअसीतिजपेदारव्यायवेतरेषपहवल्लीक्षेतावकीर्णिनंतेरे
वदीक्षितद्व्येरपर्युप्यपुनर्दीक्षयेयुराग्रयणकालेनवानांसवनीयांनिर्वपेयु
दरक्षोपसत्सुव्रतदुग्धमाद्येयुस्तेषांव्रत्यानिपयोदीक्षासुव्यातिनीयकालमुप
सदांचतुर्थमेकस्यादुग्धेनतावद्देवत्रिभिस्त्तनेस्ताव द्वाभ्यामेकेनतावद्देवसुत्या
सुहविरुच्छिष्टभक्षाएवस्युर्दर्भानाःकरंभःपरिवापःपुरोडाशःपयस्येतितै
षांयद्यत्कामयीरँस्तत्तदुपविगुल्फयेयुराशिरदुग्धोदध्यर्थंसोम्यंवाविगुल्फं

स्र·उ·६ ४२

निर्वपेयुरिति शौनको याव-च्छरावं मन्येरन्वैश्वदेव मेके बार्हस्पत्यमेके सर्वान्वानु
सवनमपिवा न्यत्रसिद्धं गार्हपत्ये पुनरधिश्रित्योपव्रतयेरन्नन्या न्वापथ्यान्
भक्षानाम्लफलेष्वेते न वर्त्तयेयुः पशुनाच ॥ ८ ॥ तस्य विभागं वक्ष्यामो हनूस
जिह्वे प्रस्तोतुः श्येनं वक्ष उद्गातुः कंठः काकुद्रः प्रतिहर्त्तुर्दक्षिणाश्रोणिर्होतुः सव्या
ब्रह्मणो दक्षिणं सक्थि मैत्रावरुणस्य सव्यं ब्राह्मणा-च्छंसिनो दक्षिणं पार्श्वं सांऽ
समध्वर्योः सव्यमुपगातॄणां सव्योंसः प्रतिप्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतु
र्दक्षिण ऊरुर-च्छावाकस्य सव्य आग्नीध्रस्य दक्षिणो बाहुरात्रेयस्य स
व्यः सदस्यस्य सदं चानूकं च गृहपतेर्दक्षिणोपादौ गृहपतेर्व्रतप्रदस्य स
व्यो पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठएनयोः साधारणो भवति तं गृहपति

४२

रेवप्रशिंष्यांज्जाघनींपत्नीभ्योहरंतितांब्राह्मणायदद्युःस्कंध्याश्चमणिकास्ति
स्रश्चकीकसाग्रावस्तुतस्तिस्रश्चैवकीकसांअर्द्धंचवैकर्त्तस्योन्नेतुरर्द्धंचैववैक
र्त्तस्यक्लोमाचशमितुस्तद्ब्राह्मणायदद्याद्यद्यब्राह्मणःस्याच्छिरःसुब्रह्मण्या
यैयःश्वःसुत्यांप्राहतस्याजिनमिळासर्वेषांहोतुर्वातावाएताःषट्त्रिंशतमेकपदा
यत्तंवहंतिषट्त्रिंशदक्षरावैबृहतीबार्हताःस्वर्गालोकास्तत्प्राणेषुचैवस्वर्गेषुचलो
केषुप्रतितिष्ठंतोयंतिसएषस्वर्ग्यःपशुर्यएनमेवंविभजंत्यथयेतोऽन्यथातद्य
थासेलगावापापकृतोवापशुंविमथ्नीरंस्तद्वत्तांवाएतांपशोर्विभक्तिंश्रौतऋ
षिर्देवभागोविदांचकारतामुहाप्रोच्यैवाऽस्माल्लोकादुच्चक्रामतामुहगिरिजा
यबाभ्रव्यायामनुष्यःप्रोवाचततोहैनामेतदर्वाङ्मनुष्याअधीयते॥२॥सर्वे

सू॰ ३॰ ६

४२

समानगोत्राः स्युरितिगाणगारिः कथं त्वाग्नी सूक्तानि भवेयुः कथंप्रयाजा
इत्यपि नाना गोत्राः स्युरिति शौनकस्तंत्राणां व्यापित्वाद्गृहपतिगोत्रान्च
याविश्वो षास्तस्यराद्धिमनुराद्धिः सर्वेषांप्रवरास्त्वावर्त्तेरन्नावापधर्मित्वाज्जाम
दग्नावत्सास्तेषांपंचार्षेयो भार्गवच्यावनाप्नवानौर्वजामदग्नेत्यथहजामद
ग्नानां भार्गवच्यावनाप्नवानेत्यार्ष्टिषेणानां भार्गवच्यावनाप्नवानार्ष्टिषे
णानूपेति बिदानां भार्गवच्यावनाप्नवानौर्वबैदेतियस्कवा धौलमौनमौकशा
र्कराक्षि सार्ष्टिसावर्णि शालंकायनजैमिनिदैवंत्यायनानां भार्गववैतहव्यसा
वेतसेति श्येतानां भार्गववैन्यपार्थेति मित्रयुवांवाध्र्यश्वेति त्रिप्रवरंवा भा
गवदैवोदासवाध्र्यश्वेति शुनकानां गृत्समदेति त्रिप्रवरंवा भार्गवशौनहो

४२
४२

त्रगार्त्समदेति॥ १०॥ गोतमानामांगिरसायास्यगोतमेत्युचथ्यानामांगिरसो
चथ्यगोतमेतिरहूगणानामांगिरसराहूगण्यगोतमेति सोमराजकीनामांगि
रससोमराज्यगोतमेति वामदेवानामांगिरसवामदेव्यगोतमेति बृहदुक्थानामां
गिरसबार्हदुक्थ्यगोतमेति पृषदश्वानामांगिरसपार्षदश्ववैरूपेत्यष्टादंष्ट्रहै
केब्रुवतेतीत्यांगिरसमष्टादंष्ट्रपार्षदश्ववैरूपेत्यक्षाणामांगिरसबार्हस्पत्यभा
रद्वाजवांदनमातवचसेतिकक्षीवतामांगिरसोचथ्यगोतमोशिजकाक्षीवतेतिदीर्घ
तमसामांगिरसोचथ्यदैर्घतमसेति भरद्वाजाग्निवेश्यानामांगिरसबार्हस्पत्य
भारद्वाजेति॥ ११॥ मुद्गलानामांगिरसभार्म्यश्वमौद्गल्येतिताक्ष्र्यहैकेब्रुव
तेतीत्यांगिरसंताक्ष्र्यभार्म्यश्वमौद्गल्येति विष्णुवृद्धानामांगिरसपौरुकु

स्रू॰ ३॰ ६
४४

त्स्यत्रासदस्यवेति गर्गाणामांगिरस बार्हस्पत्य भारद्वाज गार्ग्य शैन्येत्यांगिर
स शैन्य गार्ग्येति वा हरितकुत्स पिंग शंख दर्भ भैमगवानामांगिरसांबरीषयौ
वनाश्वेति मंधातारं हैके ब्रुवतेऽती त्यांगिरसं मांधात्रांबरीषयौवनाश्वेति संकृ
ति पूतिमाष तंडि शंबु शैवगवानामांगिरस गौरिवीत सांकृत्येति शाक्त्यो वाम्मू
लं शाक्त्य गौरिवीत सांकृत्येति ॥ १२ ॥ कण्वानामांगिरसाजमीढ काण्वेति
घोरमु हैके ब्रुवतेऽवकृष्याजमीढमांगिरस घोर काण्वेति कपीनामांगिरसा
महीयवोरुक्षयसेत्यथ य एते द्विप्रवाचनायथैतच्छौंग शैशिरयो भारद्वा
जाह श्शुंगाः कृताः शैशिरयस्तेषामुभयतः प्रवृणीतैकमितरतो द्वावितरतो
द्वौ वेतरतस्त्रीनितरतो न हि चतुर्णां प्रवरोस्ति न पंचानामति प्रवरणमांगिर

४४

45

सबार्हस्पत्य भारद्वाजकात्यात्कीलेति॥१३॥ अत्रीणामात्रेयार्चनानसश्यावा
श्वेति गविष्ठिराणामात्रेयगाविष्ठिरपौर्वातिथेति चिकितगालवकालबवमनुतं
तु कुशिकानां वैश्वामित्रदेवरातौदलेति श्रौमतकामकायनानां वैश्वामित्रदेवश्र
वसदेवतरसेति धनंजयानां वैश्वामित्रमाधुच्छंदसधानंजय्येत्यजानां वैश्वामि
त्रमाधुच्छंदसाज्येति रोहिणानां वैश्वामित्रमाधुच्छंदसरौहिणेत्यष्टकानां वै
श्वामित्रमाधुच्छंदसाष्टकेति पूरणवारिधापयंतानां वैश्वामित्रदेवरातपौरणेति
कतानां वैश्वामित्रकात्यात्कीलेत्यघमर्षणानां वैश्वामित्राघमर्षणकौशिके
ति रेणूनां वैश्वामित्रगाथिनरैणवेति वेणूनां वैश्वामित्रगाथिनवैणवे
ति शालंकायनशालाक्षलोहिताक्षलोहितजह्नूनां वैश्वामित्रशालंकायनकौ

स्मृ.उ.६

४५

त्रिकेति कश्यपानां काश्यपावत्सारासितेति निध्रुवाणां काश्यपावत्सारने
ध्रुवेति रेभाणां काश्यपावत्साररैभ्येति शांडिलानां शांडिलासितदेवलेति
काश्यपासितदेवलेति वा॥ १४॥ ॥ अथ परत्रिशिष्टं॥ ॥ भृगूणां न विवाहोस्ति च
तुर्णामादितो मिथः॥ श्येतादयस्त्रयस्तेषां विवाहो मिथ इष्यते॥ षण्णां वै गोत
मादीनां विवाहो नेष्यते मिथः॥ दीर्घतमा औचथ्यः कक्षीवांश्चैकगोत्रजाः॥ भरद्वाजाग्नि
वेश्यर्क्षाः शुंगाः शैशिरयः कृताः॥ एते समानगोत्राः स्युर्गर्गानेकेवदंतिवै॥ पृषदश्वामुद्ग
लाविष्णुवृद्धाः कण्वो गस्त्यो हरितः संकृतिः कपिः॥ यस्कश्चैषां मिथ इष्टो विवाहः सर्वैरन्यै
र्जमदग्न्यादिभिश्च॥ यावत्समानगोत्राः स्युर्विश्वामित्रोनुवर्त्तते॥ तावद्वसिष्ठश्चात्रिश्च क
श्यपश्च पृथक् पृथक्॥ द्व्यार्षेयाणां त्र्यार्षेयसंनिपाते अविवाहः॥ त्र्यार्षेयाणां पंचार्षेय

४५

संनिपाते ऽविवाहः॥ विश्वामित्रो जमदग्निर्भरद्वाजोथ गोतमः॥ अत्रिर्वसिष्ठः कश्यप इत्येते सप्त ऋषयः॥ सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते॥ एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते॥ तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरसां गणादित्यसमानप्रवरैर्विवाहः॥ १॥ ॥ इति परिशिष्टं॥ ॥ वासिष्ठेति वसिष्ठानां ये ऽन्य उपमन्युपराशरकुंडिनेभ्य उपमन्यूनां वासिष्ठाभरद्वस्विंद्रप्रमदेति पराशराणां वासिष्ठशाक्त्य पाराशर्येति कुंडिनानां वासिष्ठमैत्रावरुणकौंडिन्येत्यगस्तीनामागस्त्यदार्ढच्युतेध्मवाहेति सोमवाहो वोत्तम आगस्त्यदार्ढच्युतसोमवाहेति पुरोहितप्रवरो राज्ञामथ यदि सार्षप्रवृणीरन्मानवैलपौरूरवसेति तीति सत्राणि तान्यदक्षिणानि तेषामंते ज्योतिष्टोमः पृष्ठ्यशमनीयः सहस्रदक्षिणो ऽन्यो वा प्रज्ञातदक्षिणो दक्षिणावता पृष्ठ्यानि शमयेरन्निति विज्ञायते स एव हेतुः प्रकृतिभावे प्रकृतिभावेन नमो ब्रह्मणे नमो ब्रह्मणे नम आचार्येभ्यो नम आचार्येभ्यो नमः शौनकाय नमः शौनकाय॥ १५॥ ॥ इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के षष्ठो ऽध्यायः॥ ॥ श्रीरस्तु॥

॥इत्याश्वलायनश्रौतसूत्रउत्तरषट्कः समाप्तः॥

॥ अथश्रौतसूत्रपूर्वषट्कप्रारंभः ॥

स्र·पू·१

१

श्रीगणेशाय नमः॥ ॥हरिः ॐ३॥ ॥अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामोऽ
ग्न्याधेयप्रभृतीन्याह वैतानिकानि दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तंत्रस्य तत्राम्नात
त्वाद्दर्शपूर्णमासयोर्हविःष्वासन्नेषु होता मंत्रितः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो य
ज्ञोपवीत्याचम्य दक्षिणावृद्विहारं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीता इध्ममपरेणाप्र
णीते चात्वालं चात्वालवत्स्वेतत्तीर्थमित्याचक्षते तस्य नित्याः प्रांचः श्वेष्टा अंकधार
णाच्च यज्ञोपवीतशौचे च विहाराद्व्यावृत्तिश्च तत्र चेत्कर्मैकांगवचने दक्षिणं प्रतीयाद्दनादेशे
कर्मचोदनायां होतारं दद्यातीतियजमानं जुहोति जपतीति प्रायश्चित्ते ब्रह्माणमध्वंपा
दग्रहणे स्रुक्तं स्रुक्ताहो हीनेपादेऽधिकेतच्च सर्वत्र जपानुमंत्रणाऽऽप्यायनोपस्थानान्यु
पांशु मंत्राश्च कर्मकरणाः प्रसंगादपवादो बलीयानपद्याभिहतत्तरेण पादेन वोदश्रो

१

ण्योत्तरयापाहम्२ समानि धाय प्रपदेन बर्हिराक्रम्य संहितो पाणी धारयन्नाकानावत्यं

गुली हृदयसंमितावंकसंमितो वाद्या वा पृथिव्योः संधिमीक्षमाण एतद्धोतुः स्थानमास

नं वा सर्वत्रैवं भूतो वचनादन्यत्रोषितो जपति ॥ १ ॥ नमः प्रवक्त्रे नम उपद्रष्ट्रे नमोनुख्या

त्रे क इदमनुवक्ष्यति स इदमनुवक्ष्यति षण्मा वरि रं हस स्पांतु द्यौश्च पृथिवी चाहश्च रात्रि

श्चापश्चौषधयश्च वाक्स मास्थितयज्ञः साधुछंदां सि प्रपद्येह मेव मामसुमितिस्वं नामा

दिश्योत भू ते भविष्यति जातेजनिष्यमाण आप्त जाम्य पाव्यं वाचो अशांतिं वहे त्यंगु

ल्यग्राण्यवकृष्य जातवेदोर मयापश्म न्मयीति प्रतिसंदध्याद्धर्म मेधावा पृथि

वी वर्मा ग्निर्वर्म सूर्ये वि वर्म मे संतु तिरश्चिकाः ॥ तदध्यवाचः प्रथमं मसीयेति समाप्य सा

मिधेनीरन्वाह हिं ३ इति हिंकृत्य भूर्भुवः स्वरो ३ मित्येषो ऽपि हिंकारो भूर्भुवः स्वरित्येव

तिजप

स्व॰ सू॰ १

जपित्वा कोत्सो हिंकरोति न च पूर्वं जपं जपत्यथ सामिधेन्यः प्रवो वाजा अभिद्यवोऽग्न
आयाहि वीतये गृणानईळेन्यो नमस्यस्तिरो ऽग्निं दूतं वृणीमहे समिध्यमानो अध्वरे
समिद्धो अग्न आऊतेति हूँता एकश्रुति संततमनुब्रूयादुदात्ताऽनुदात्तस्वरिता नापरः सं
निकर्षऐकश्रुत्यं स्वरादिमगं तमोकारं त्रिमात्रं मकारांतं कृत्वोत्तरस्या अर्धर्चे वस्येत्तत्सं
ततमेतदवसानमुत्तरादानमविप्रमोहे समाप्तौ प्रणवेनावसानं चतुर्मात्रो वसाने तस्यां
तापत्तिः स्पर्शेषु स्ववर्ग्यमुत्तमं तस्थासुतां तामनुनासिकां रेफोष्मस्वनुस्वारं त्रिः प्रथ
मोत्तमे अन्वाहाऽध्यर्द्धकारं मध्यधौ मुक्त्वावस्येदथ हूँ हूँ प्रथममुत्तमस्यां मथा ध्यर्धा
ताः पंच दशाभ्यस्ताभिरेतेन दास्त्रयाज्या निगदानुवचनाभिष्टवनसंस्तवनानि
न त्वन्यत्राध्यर्द्धकारं न जपः प्रागभिहिंकारान्नाभिहिंकाराभ्यासाव बऊ षु प्र हू

२

स्यानाव छेदादौ शास्त्रेष्वेव होत्रकाणामपि हिंकारः सामिधेनीनामुत्तमेन प्रणवेनाग्ने
महाँ असि ब्राह्मण भारतेति निगदेवसाय ॥ २ ॥ यजमानस्यार्षेया न्प्रवृणीते यावंतः स्युः
परं परं प्रथमं पौरोहित्यान्राजविशां राजर्षीन्वारा ज्ञां सर्वेषां मानवेति संशाये देवेद्धो म
न्विद्ध ऋषिष्टुतो विप्रानुमदितः कविशस्तो ब्रह्मसंशितो घृताहवनः प्रणीर्यज्ञानां रथी
रध्वराणामतूर्तो होता तूर्णिर्हव्यवाळित्यवसायाऽऽस्पात्रं जुहूर्देवानां चमसो देवपानो
राँ इवाग्ने नेमिर्देवाँ स्त्वं परिभूरस्यावह देवान्यजमानायेति प्रतिपद्य देवता द्वितीयया
विभक्त्याऽऽ देवाँमाद्देशामावहेत्यावाहयत्यादिं ह्लावयन्नग्न आवहेति तु प्रथमं देवताम
ग्निं सोममित्याज्यभागावग्निमग्नीषोमाविति पौर्णमास्यामग्नीषोमयोः स्थान
इंद्राग्नी अमावास्यायामसंनयतः इंद्रं महेंद्रं वा सन्नयतोऽन्तरेण हविषी विष्णुमुपांश्वे

स्रू॰पू॰ १

३

तरेयिणोऽग्नी षोमीयंपोर्णमास्यां वै छ्लवममावास्यायामेके नैके कंचनाऽन्येषामप्युपांशु
नामावहस्वाहायाद् प्रियाधामानी दंहविर्महोज्यायइत्युच्चैर्यन्येतद्वचनाः परोक्षास्तानु
पांशू च्चैर्वाप्रत्यक्षमुपांशुप्रतिचोदनमावाहनं सर्वा आदिश्य सकृदेकप्रदानास्तथोत्तरेषु
निगमेष्वेकामिव संस्तुयात्समानां देवतां समानार्थमिव्यवहितां सकृन्निगमेष्वोक्लास्वा
वापिकासु देवाँ आज्यपाँ आवहाऽग्निं होत्रायावह स्वंमहिमानमावहाऽऽ वहजातवेदः सुय
जायजेत्यावाह्ययथास्थितमूर्ध्वजानुरूपविश्योदग्वेदेर्व्यह्यत्तृणानिभ्रमोप्रादेशं कुर्या
दद्दितिर्मतास्यांतरिक्षान्मा च्छेत्सीरिदमहमग्निनादेवेन देवतया त्रिवृताऽस्तोमेन रथंत

३

रेण साम्नागायत्रेण छंदसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण योस्मान्द्वेष्टि यंच व
यंद्विष्मस्तंहन्मीत्याश्रावयिष्यंतमनुमंत्रयेताऽऽ श्रावयय ज्ञं देवेष्वाश्रावयमांमनुष्येषु॥

कीर्त्यै यशसे ब्रह्मवर्चसायेति प्रवृणानं देव सवितरेतं त्वा वृणते ऽग्निं होत्राय सह पित्रा वै
श्वानरेण द्यावापृथिवी मां पातामग्निर्होता हं मानुष इति मानुष इत्यध्वर्यौः श्रुत्वोदायुषा स्वा
युषोदोषधीनां रसेनोत्पर्जन्यस्य धामभिरुदस्थाममृतां अन्वित्युत्तिष्ठेत्सष्टिश्चाध्वर्यो
नव तिष्ठ्व पात्वाग्निं होतारमंतरा विचक्त्राः ॥ सिनं तिपाकमतिधीरएती त्युत्थाय ऋत
स्य पंथामन्वेमि होतेत्यभिक्रम्या ऽसे ध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना ऽग्नीध्रमंक
देशेन सव्येन वेद्म न्वारभामहे होतृवूर्ये पुरोहितं ॥ येनायन्नुत्तमं स्वर्देवा अंगिरसो दिव
मिति संमार्गत्वे नोस्त्रिरभ्या त्मंमुखं संमृजीत संमार्गोसि सं मां प्रजया पशुभिर्मृड्ढीति
सकृन्मंत्रेण द्विस्तूष्णीं सर्वत्रैवं कर्मावृत्तौ स्पृष्टोदकं होतृषदनमभिमंत्रयेता ऽहे दैधि
षव्योदतस्तिष्ठान्यस्य सदने सीद योस्मत्पाकतर इत्यंगुष्ठोपकनिष्ठिकाभ्यां होतृ

स्रू॰ द्वू॰ १
४

षदनात्तरणंप्रत्यगदक्षिणानिरसेन्निरस्तः परावसुरितीदमहमर्वावसोः सदनेसीदा
मीत्युपविशेद्दक्षिणोत्तरिणोपस्थंनैतेनिरसनोपवेशनेसर्वासनेषुसर्वेषांमहरहः प्रथ
मोपवेशनेपिसमानेद्वितिगोतमः॥३॥ब्रह्मौदनेप्राशिष्यमाणेऽग्न्याधेयेब्रह्माब
हिष्पवमानात्प्रत्येत्यसोमेप्रस्तप्यहोतास्त्वुगादापनेपत्नीसंयाजिकेनान्यत्र
होतुरितिकौत्सउपविशयेदेवबर्हिः स्वासस्थंत्वाध्यासदेयमित्यभिहिषहोतः प्रतरांबर्हि
षद्भवेतिजानुशिरसाबर्हिरुपस्पृश्यातऊर्ध्वंजपेद्भूपतयेनमोभुवनपतयेनमोभूतानां
पतयेनमोभूतयेनमः प्राणंप्रपद्येऽपानंप्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुःप्रपद्येश्रो
त्रंप्रपद्येमनःप्रपद्यआत्मानंप्रपद्येगायत्रींप्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येऽनुष्टु
भंप्रपद्येछंदांसिप्रपद्येसूर्योनोदिवस्पातुनमोमहद्भ्योनमोअर्भकेभ्योविश्वेदेवाः

४

रास्तनमायथेहाराधिहोतानिषद्यायजीयाँस्तदद्यवाचः प्रथमंमसीयेतिसमाप्य
प्रदीप्तइध्मेस्त्रुचावादापयेन्निगदेनाऽग्निर्होतावेत्वग्नेहोत्रंवेत्तुप्रावित्रंसाधुतेयजमा
नदेवतायोऽग्निमित्यवसाय होतारमवृथाइतिजपेदथसमापयेद्घृतवतीमध्वर्यो
स्त्रुचमास्यस्वदेवयुवंविश्ववारेईळामहेदेवाँईळेन्यांनमस्यामनमस्यान्यजामयज्ञिया
नितिसमाप्तेस्मिन्निगदेऽध्वर्युराश्रावयतिप्रत्याश्रावयेदाग्नीध्रउत्करदेशेतिष्ठन्स्फ्य
मिध्मसन्नहनानीत्यादायदक्षिणामुखइतिशाङ्खायनकमस्तुश्रौ३षड्ढित्योंकारंप्ला
वयन्॥ ४॥ प्रयाजेश्वरतिपंचैतेभवंत्येकैकंप्रेषितोयजत्याग्र्यां ज्यादिरनुयाज
वर्जंये३यजामहइत्यागूर्वषट्कारोंत्यः सर्वत्रोच्चैस्तरांबलीयान्याज्यायास्तयोराद्दी
प्लावयेद्याज्यांतंचविविच्यसंध्यक्षराणामकारंनेचेईवंचनोव्यंजनांतोवाविसर्ज नेनेत्कृष्यध्यो

स्तु॰पू॰ १

५

नीयो नत्यक्षरोपधो रिफ्यतं॥ इतरश्च रेफी लुप्यते रेफी प्रथमः स्वंत तीयं नित्यं मकारे। ये ३
यजामहे समिधः समिधो ऽग्न आज्यस्य व्यंतु ३ वौ षळिति वषट्कार। इति प्रथमो वा
गो जः सह ओजो मयि प्राणापानाविति। वषट्कारमुक्त्वोत्कानुमंत्रयते। द्विवाकीर्त्यो वषट्का
रस्तथानुमंत्रणमेतद्वा। ज्यानिदर्शनं। तनूनपादग्न आज्यस्य वेत्विति द्वितीयो ऽन्यत्र व
सिष्ठशुनकाः। त्रिवध्यश्चराजन्येभ्यो। नराशंसो अग्न आज्यस्य वेत्विति तेषां। मिळो अग्न
आज्यस्य व्यंत्विति ततीयो। बर्हिरग्न आज्यस्य वेत्विति चतुर्थ। आग्नेयं पंचमे स्वाहामुं स्वाहा॥
मुमिति यथावाहितमनुद्रुत्य देवता॥ यथा चोदितमनावाहिताः स्वाहा देवा आज्यपा जुषाणा
अग्न आज्यस्य व्यंत्विति। यातो मंद्रेणार्धर्चशंयुवाकान्मध्यमेन हवींष्या स्विष्टकृतं॥ उत्तमे
न त्रोषो ऽग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्यानुवाक्या। त्वं सोमासि सत्पतिरित्युत्तर

५

स्यं जुषाणो अग्निरा ज्यस्य वेत्विति पूर्वस्य याज्या जुषाणः सोम आज्यस्य हविषो वे
त्वित्युत्तरस्य तावा गूर्याऽऽ देशं यजति सर्वाश्चानुवाक्यावत्यो प्रैषाँ अन्या आम्नाया त्याश्च्यः
सोमिकीष्य श्व या अंतरेण वैश्वानरीयं पत्नी संयाजाँश्चैतौ वार्त्रघ्नौ पौर्णमास्यामनुवाक्या
लिंग विशेषान्नामधेयान्यत्वं ततो विचारो नित्येयाज्येद्धं धन्वं तावमावास्यायामग्निः
प्रत्नेन मन्मना सोमगीर्भिष्ट्वा वयमित्याते वाग्यमनं मंतराच्च याज्यानुवाक्ये निगदा
नुवचनाऽऽशिष्टवनन्द्रास्त्र जपानां चाख्याऽऽ समाहितेरन्य यज्ञस्य साधनादापद्याऽ तो
देवा अवंतु न इति जपेद्दपिवान्यां वैष्णवीं ॥५॥ उक्तादेवतास्तासां याज्यानुवाक्या अग्नि
र्मूर्द्धा भुवो यज्ञस्याऽ यमग्निः सहस्रिण इति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष ए
तां मग्नीषोमा सवेदसायुवमेतानि दिविरोचनानीन्द्राग्नी अवसागतं गीर्भिर्विप्रः प्र

स्रु·प्र·१

६

मतिमिछमानं ऐंद्रस्तान सिंरयिंप्रससासा हिषे पुरुहूतशात्रून्महाँइंद्रोय ओजसा भुवस्त्वामिं
द्र ब्रह्मणा महानिति य द्यग्नीषोमीय उपांशुयाजोऽग्नीषोमायो अद्यवामान्यं दिवोमात
रिश्वाजभारेत्यथास्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्यायै ३ यजामहेऽग्निं स्वि
ष्टकृतमयाळग्निरित्युक्त्वा षष्ठ्या विभक्त्या देवतामादिश्य प्रियाधामान्ययाळित्युपसं
तनुयादेवमुत्तरांश्चयाळयाळिति त्वेवतासां पुरस्तादाज्यपांतमनुक्रम्य देवानामाज्यपा
नां प्रियाधामानियक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमानमायजतामेज्याइषः
कृणोतु सो अध्वराजातवेदाजुषतां हविरग्ने यदद्यविशो अध्वरस्य होतरित्यनवानंय
जति प्रकृत्यावा॥६॥ प्रदेशिन्याः पर्वणी उत्तमे अंजयित्वौष्ठयोरभ्यात्मं निमार्ष्टि वा
चस्पतिनातेऽऊतस्येषे प्राणाय प्राश्नामीत्युत्तरमुत्तरैर्मनसस्पतिनातेऽऊतस्यो

६

जैऽपानाय प्राश्नामी त्यधरमधरे स्पृष्टोदकमंजलिने ळं प्रतिगृह्य सव्ये पाणौ कृत्वा पश्चाद स्याउदगंगुलिं पाणिमुपधाय आवां तरे ळामनदापयीतां ऽ तरेणांगुष्ठमंगुलीश्च स्व यं द्वितीयमाददीत प्रत्यालब्धामंगुष्ठेनाभिसंगृह्य प्रत्यास्ट्त्यांगुलीरमुष्टिं कृत्वा दक्षिणत इळां परिगृह्योऽऽस्यसंमितामुपह्वयते प्राणसंमितां वा ॥ इळोपहूता सह दिवा बृहतादित्येनोपास्मां इळा ह्वयतां सह दिवा बृहतादित्येनेळोपहूता सहांतरिक्षेण वामदेव्येन वायुनोपास्मां इळा ह्वयतां सहांतरिक्षेण वामदेव्येन वायुनेळोपहूता सह पृथिव्या रथंतरेणाग्निनोपास्मां इळा ह्वयतां सह पृथिव्या रथंतरेणाग्निना ॥ उपहूता गावः सहाशिर उप मां गावः सहाशिरा ह्वयंतामुपहूता धेनुः सहर्षभोप मां धेनुः सहर्षभा ह्वयतामुपहूता गौर्घृतपद्युप मां गौर्घृतपदी ह्वयतामुपहूता दिव्याः सप्त होतार उ

पमां दिव्याः सप्तहोतारो ह्वयंतामुपहूतः सखा भक्षः उपमां सखा भक्षो ह्वयतामुपहूते
ळा वृष्टिरुपमामिळा वृष्टिर्ह्वयतामित्युपांश्वथोच्चैः॥ इळोपहूतोपहूतेळोपास्माँ इळा ह्वयतां
मिळोपहूता॥ मानवी घृतपदी मैत्रावरुणी ब्रह्म देवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उप
हूता मनुष्याः॥ य इमं यज्ञमवान्ये च यज्ञपतिं वर्द्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी
देवी देवपुत्रे॥ उपहूतोयंयजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा
हविर्जुषंतामिति तस्मिन्नुपहूत इत्युपहूयाऽवांतरेळां प्राश्नीयादिळे [illegible] भागं जुषस्व नः
पिन्व गा जिन्वार्वतो रायस्पोषस्येशिषे तस्य नो रास्व तस्य नो दास्तस्यास्ते भागमशीमहि॥
सर्वात्मानः सर्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपुरुषा इति वा॥ ७॥ मार्जयित्वाऽनुया
जैश्चरंति परिस्तरणैरंजलिमंतर्धायाऽपश्रासेचयतेतन्मार्जनं देवा इयोऽनुयाजा वी

तवत्पदांतास्त्रय एकैकं प्रेषितो यजति देवं बर्हिर्वसुवने वसुधेयस्य वेतु ॥ देवो नराशंसो व
सुवने वसुधेयस्य वेतु ॥ देवो अग्निः स्विष्टकृत् सुद्रविणा मंद्रः कविः सत्यमन्मा यजी होता
होतुर्होतुरायजी यानग्ने यान्देवानयाड्याँ अपिप्रेर्ये ते होत्रे अमत्सत तां ससनुषीं हो
त्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वी
हीत्यनवानं वा ॥ ८ ॥ सूक्तवाकाय संप्रेषितः इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमु
त नमोवाकमृध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि ॥ उपश्रुती दिवस्पृथिव्योरोम
न्वती तेस्मिन्यज्ञे यजमान द्यावापृथिवी स्तां ॥ शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुग
व्यूती अभयं कृतौ ॥ वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवौ ऊर्जस्वती पयस्वती सू
पचरणा च स्वधिचरणा च तयोराविदी त्यवसाय प्रथमया विभक्त्या द्वित्रयदेवता

सू॰ मृ॰ १

मिदं हविर् जुषतां वीवृधत महो ज्यायो कृते त्युपसंतनु या देवमुत्तरा अन्वाताम कृतेति यथार्थमुक्तमुपांशो रावापिकां तमनु द्रुत्यद्देवा आज्यपा आज्यम जुषं तां वीवृधंत महो ज्यायो कृतो ऽग्निर्होत्रेणेदं हविर् जुषतां वीवृधतमहो ज्यायो कृत॥ अस्याम्रधे द्धोत्रायां देवं गमायामाशास्ते ऽयं यजमानो ऽ सावसा वित्यस्यादिश्य नामनी उपांशु संनिधो गुरोः॥ आयुराशास्ते सुप्रजास्त्वमाशास्ते रायस्पोषमाशास्ते सजातवनस्यामाशास्ते उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदश्याः त्तदृध्या त्तदस्मै देवारासंतां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः॥ इष्टं च वित्तं चोभे च नो द्यावापृथिवी अंहसस्पातामेह गतिर्वामस्येदं नमो देवेभ्य इति॥८॥ शंयुवाकाय संप्रेषित स्त्वच्छंयोरावृणीमह इत्याहानु

वाक्यावद्ग्रणवां वेद मस्मेप्रय छत्यध्वर्युस्त्वंग्ट्छीयाद्धिदोसिवेदो विदेये त्सुदायुषेत्येतेनोपोत्थाय पश्चाजार्हपत्यस्योपविश्यसोमं त्वष्टारं देवानांपत्नीरग्निंग्टहपतिमित्याज्येनयजं त्याप्यायस्वसमेतुतेसंतेपयांसिसमुयंतुवाजा इह त्वष्टारमग्रियंतन्नस्तुरीपमधपोषयित्नुदेवानांपत्नी रुशतीरवंतुनइतिद्वे अग्निर्होताग्टहपतिः सराजाहव्यवाळग्निरजरः पिता नइतिपत्नीसंयाजां अथप्रजाकामोराकांसिनीवालीकुहूमितिप्राग्ग्टहपतेर्यजेतराकामहंसिनीवालिकुहूमहमितिद्वे द्वे याज्यानुवाक्ये॥ कुहूमहंसुवृतंविद्मनापसमस्मिन्यज्ञेसुहवांजोहवीमि॥ सानोददातुश्रवणंपितृणांतस्येतेदेविहविषाविधेम॥ कुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषः शृणोतु॥ संदाशुषेकिरतुभूरिवामंरायस्पोषंयजमानेदधातित्याज्यंपाणितलेवदापयीतेळामुपहूयसर्वांप्राश्नीयाच्छंयुवाकोभवे

स्रु॰ सू॰ ३

९

न्नवा॥ १०॥ वेदंपत्न्यैप्रदायवाचयेद्धोताध्वर्युर्वा वेदोसिवित्तिरसिविदेयकर्मासिकरणम
सिक्रियासंसनिरसिसनितासिसनेयंघृतवंतंकुलायिनंरायस्पोषंसहस्रिणंवेदोददातुवा
जिनं॥यंबर्हवउपजीवंतियोजनानामसद्दृशी॥तंविद्येयप्रजांविद्येयकामायत्वेतिवेदंशि
रसानाभिदेशमालभेतप्रजाकामाचेदथास्यायोक्तंविचृतैत्प्रत्वामुंचामिवरुणस्यपाशा
दितितत्प्रत्यग्गार्हपत्याद्विगुणंप्राक्पाशंनिधायोपरिष्टाद्दस्योदगग्राणिविदत्तृणानिक
रोतिपुरस्तात्पूर्णपात्रंसंश्लिष्टंवेदतृणैरभिमृशयवाचयेत्पूर्णमसिपूर्णंमेभूयाःसुपूर्ण
मसिसुपूर्णंमेभूयाःसदसिसन्मेभूयाःसर्वमसिसर्वंमेभूयाअक्षितिरसिमामेक्षेष्ठाइत्य
थैनांपूर्णपात्रात्प्रतिदिशमुदकमुदुक्षन्नुदुक्षंतीवाचयति॥प्राच्यांदिशिदेवाऋत्विजोमा
र्जयंतांदक्षिणस्यांदिशिमासाःपितरोमार्जयंतांप्रतीच्यांदिशिगृहाःपशवोमार्जयंतामु

९

दीच्यां दिश्यापओषधयो वनस्पतयो मार्जयंतामूर्ध्वायां दिशियज्ञः संवत्सरः प्रजाप
तिर्मार्जयतांमार्जयंतामितिवाऽथास्याउत्तानमंजलिमधस्ताद्यो ऽक्रस्यनिधायाऽऽत्म
नश्चसव्यंपूर्णपात्रंनिनयन्वाचयेन्माहंप्रजांपरासिचंयानः सयावरीस्थन॥ समुद्रंवो
निनयानिस्वंपाथोऽप्पीथेतिवेदस्तृणान्यग्नेरहीत्वाऽविधून्वन्नसंततंस्तृणन्नसव्येनगा
र्हपत्यादाहवनीयमेतितंतुतन्वन्नजसोभानुमन्विहीतित्रेषंनिधायप्रत्यगुदगाहवनी
यादवस्थायस्थाल्याः स्रुवेणादायसर्वप्रायश्चित्तानिजुहुयात्स्वाहाकारांतैर्मंत्रैर्नचेन्मंत्रे
पठितोयत्किंचाप्रेषितोयजेदन्यत्राप्येवंभूतोव्यक्तहोमाध्याधानोपस्थानानिच॥ अ
याश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि॥ अयासावयसाहृतोयासन्हव्यमूहि
षेयानोधेहिभेषजंस्वाहा॥ अतोदेवाअवंतुनइतिद्वाभ्यांव्याहृतिभिश्चभूः स्वाहाभुवः

स्वाहा। स्वः स्वाहा भूर्भुवः स्वः स्वाहेति ऊत्वा संस्थाजपेनोपस्थायंतीर्थेन निष्क्रम्याऽनिय
मं ओं चमेस्वरश्चमेयज्ञोपचतेनमश्च॥ यत्ते न्यूनं तस्मैत उपयन्तेऽतिरिक्तं तस्मै तेनमइति
संस्थाजपइतिहोतुः॥ ३३॥ अथब्रह्मणोहोत्राचमनं यज्ञोपवीतशौचानि नित्यः सर्वकर्म
णां दक्षिणतो ध्रुवाणां व्रजतां वा बहिर्वेद्यां दिशां व्रजेयुः सैवतत्र प्राची चेष्टास्वमंत्रासुस्था
नाऽऽसनयोर्विकल्पस्तिष्ठद्धोमाश्च ये वषट्कारा आसीतान्यत्र समस्तपाण्यंगुष्ठोऽ
ग्रेणाहवनीयं परीत्य दक्षिणतः कुशेषूपविशेद्बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृह
स्पतेयज्ञं गोपायेत्युपविश्य जपेदेष ब्रह्मजपः सर्वयज्ञतंत्रेषु साग्नौ यत्रोपवेशनं मुपवि
ष्टमति सर्जयते ब्रह्मन्नपः प्रणेष्यामीति श्रुत्वा भूर्भुवः स्वर्बृहस्पतिप्रसूत इति जपित्वों

प्रणयेत्यतिसृजेत्सर्वत्र यथाकर्मत्वादेशाः प्रणवाद्युच्चैरूर्ध्ववाक् प्रणवादत ऊर्ध्ववाग्य

त आस्त आहविष्कृत उद्वादनादामार्जनोत्पत्नौ सोमे घर्मादिचाऽतिप्रैषादिचाऽसुब्रह्मण्या
याः प्रातरनुवाकाद्यांतर्यामाद्ध्रिवतोनुसवनमेव्ळायाः स्तोत्रेष्वातिसर्जनाद्यावषट्का
रांदोहचः पवमानेषुयच्चाकिंच मंत्रवद्धोत्राशेष आपत्तिश्च यत्रत्वग्निः प्रणीयतेऽपिससो
मेतदादितत्रवाग्यमनंदक्षिणतश्चब्रह्मजंजपत्याश्वः शिशान इति सूक्तं संमाप्योपवेशमाद्यु
क्तं नतु सोमिके प्रणयने ब्रह्मजपोऽन्यत्रविसृष्टवागबऊभाषीयज्ञमनाविपर्यासेतरि
तेमंत्रैकर्मणिवाख्यातेवोपलक्ष्यवाजान्वाच्याऊतिंजुऊयादक्तश्चेद्भूरिति गार्हपत्येयजुष्टो
भुव इति दक्षिणे आग्नीध्रीये सोमेषु सामतः स्वरित्याहवनीये सर्वतोविज्ञाते वा भूर्भु
वः स्वरित्याऽऽहवनीय एवं प्राक्स्रयाजेभ्योंगारं बहिष्परिधिनिर्वृत्तं स्त्रुवदंडेनाभिनिदध्या
न्मातपोमायज्ञस्तपन्मायज्ञपतिस्तपत्॥ नमस्ते अस्त्वायते नमो रुद्र परायते नमो यत्र नि

स्र·प्र·१

३३

षीदसीत्यमुंमाहिंसीरमुंमाहिंसीरितिच्चंप्रतिदिश्यामध्वर्युर्यजमानोपुरस्ताच्चेद्ब्रह्मयज
मानोदक्षिणतोहोतृपत्नीयजमानान्पश्चादाग्नीध्रयजमानाउत्तरतोऽथैनमनुप्रहरेदाहंय
ज्ञंददेनिर्ऋतेरुपस्थात्तंदेवेषुपरिददामिविद्वान्॥ सुप्रजास्त्वंशतहिमामदंतदिहनोदेवाम
यित्रामर्यच्छतेतितमभिजुहुयात्सहस्रश्रृंगोवृषभोजातवेदाःस्तोमपृष्ठोघृतवान्सुप्र
तीकः॥ मानोहिंसीद्धिंसितोनेत्वाजहामिगोपोषंचनोवीरपोषंचयच्छस्वाहेति॥१२॥ प्रा
शित्रमाह्रियमाणमीक्षतेमित्रस्यत्वाचक्षुषाप्रतीक्ष इतिदेवस्यत्वासवितुःप्रसवेऽश्विनो
र्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंजलिनाप्रतिगृह्यपृथिव्यास्त्वानाभौसादया
म्यदित्याउपस्थइतिकुशेषुप्रागदंडंनिधायांऽगुष्ठोपकनिष्ठिकाभ्यामसंखादन्प्राश्नीया
दग्नेष्ट्वास्येनप्राश्नामिबृहस्पतेर्मुखेनेत्याचम्याचाचामेत्सत्येनत्वाभिजिघर्मियाअ

११

प्स्वं तद्देवतास्ता इदं शमयंतु चक्षुः श्रोत्रं प्राणान्मे मा हिंसीरितीदस्य त्वा जठरे दधामीति ना
भिमालभेत प्रक्षाल्य प्राशित्रहरणं त्रिरनेनाभ्यात्मम पोनिनयते मार्जयित्वास्मिन्ब्रह्म भा
गं निदध्यात्पश्चात्कुशेषु यजमानभागमन्वाहार्यमवेक्षेत प्रजापतेर्भागोस्यूर्जस्वान्पय
स्वान् अक्षितिरसि मा मे क्षेष्ठा अस्मिंश्च लोकेऽमुष्मिंश्च प्राणापानौ मे पाहि कामाय त्वेत्यस्य
शान्त्व घ्रायां गुष्ठोपकनिष्ठिकाभ्यां शिष्टं गृहीत्वा ब्रह्मभागे निदध्याद्ब्रह्मन्प्रस्थास्याम
इति श्रुत्वा बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्ट बृहस्पते यज्ञमजूगुपः स यज्ञं पाहि स यज्ञप
तिं पाहि स मां पाहि भूर्भुवः स्वर्बृहस्पतिप्रसूत इति जपित्वा प्रतिष्ठेति समिधमनुजानीयात्सं
स्थिते जघन्यमृत्विजां सर्वप्रायश्चित्तानि जुहुयात्तमितरेन्वालभेरन्होतारं वैतयोर्नित्यहोमः
सर्वे संस्थाजपे नोपतिष्ठंत उपतिष्ठंते ॥ १३ ॥ ॥ इत्याश्वलायनश्रौतसूत्रे पूर्वषट्के प्रथमोध्यायः ॥

॥ ॥हरिः ॐ ३॥ ॥पौर्णमासेनेष्टिपश्चुसोमाउपदिष्टास्तैरमावास्यायांपौर्णमास्यांवायजे
तराजन्यश्चाग्निहोत्रंजुऊयात्तपस्विनेब्राह्मणायेतरंकालंभक्तमुपहरेद्व्रतसत्यशीलैः
सोमसुत्सदाजुऊयाद्द्वऊषुबहूनामनुदेशःआनंतर्ययोगोद्वेद्वेतुयाज्यानुवाक्येअदृष्टा
देशेनित्येअग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसिफल्गुनीषुविशाखयोरुत्तरयोःप्रो
ष्ठपदयोरेतेषांकस्मिंश्चिद्वसंतेपर्वणिब्राह्मणआदधीतग्रीष्मवर्षाशरत्सुक्षत्रियवैश्यो
पक्रुष्टायस्मिन्कस्मिंश्चिदृतावादधीतसोमेनयक्ष्यमाणोनर्तुंपृच्छेन्ननक्षत्रमश्वत्थाच्छ
मीगर्भादरणीआहरेदनपेक्षमाणोयोअश्वत्थःशमीगर्भआरूरोहत्वेसचा॥तंत्वाहरामिब्र
ह्मणायत्तियेःकेतुभिःसहेतिपूर्णाऊत्यंतमग्न्याधेयंयदित्विष्टयस्तनुयुःप्रथमायामग्नि
रग्निःपवमानोऽग्नआयूंषिपवसेऽग्नेपवस्वस्वपाःसहव्यवाळमर्त्योऽग्निर्होतापुरोहितइति

स्विष्टकृतः संयाज्ये इत्युक्ते सोविष्टकृती प्रतीयात्सर्वत्रदेवताऽऽगमेनित्यानामपयोऽयाः
स्विष्टकृतमंतराज्यभागौ च तास्तत्स्थाने एषसमानजातिधर्मो द्वितीयस्यांतुधन्वंतौ वग्निः
पावकोऽग्निः शुचिः सनः पावकदीदिवोग्नेपावकरोचिषा॥ अग्निः शुचिव्रततमउदग्नेशु
चयस्तवसाक्कान्विश्वा अभियुजोग्निमीळेपुरोहितमितिसंयाज्ये तृतीयस्यांसामिधेन्या
वावपतेप्रागुपोत्तमायाः पृथुपाजा अमर्त्यइति द्वैधाय्येइत्युक्तएतेप्रतीयात्तुष्टिमंतावृ
ग्निनारायिमश्नवत्रूयस्फानोअमीवहेत्यग्नीषोमाविंद्राग्नीविष्णुरितिवैकल्पिकान्य
दितिरुतत्वामदितेमहिमिही मूषुमातरंसुव्रतानाम्नतस्यपत्नीमवसेऊवेम॥तुविक्षत्रामजरं
तीमुरूचीसुशर्माणमदितिंसुप्रणीतिं॥ प्रेद्धो अग्नइमोअग्नइतिसंयाज्ये विराजावित्युक्त
एतेप्रतीयाददितितिस्रआद्यो त्तमेवैवस्यातामाद्यावातथासतितस्यामेवधाय्येविराजौवि

तिमात्रे विकारे वैराजतं त्रेतिप्रतीयाद्दाधानाद्धुद्दत्वा रात्रमजस्त्रां अत्यंतंतुगतश्रियः॥ ३॥ उत्सर्गे
परा‍ह्णे गार्हपत्यं प्रज्वल्य दक्षिणाग्निमानीय विकुलाद्वित्तवतो वैकयोनयद्द्रत्येके ध्रियमा
णं वा प्रज्वल्यारणिमंतं वा मथित्वा गार्हपत्याद्दाहवनीयं ज्वलंतमुद्धरेद्वं त्वादेवेभ्यः श्रिया
उद्धरामीत्युद्धरेदुध्रियमाण उद्धरपाप्मनो माय द्विद्वान्यच्चविद्वांश्चकार॥ अग्ना यदेनः कृ
तमस्ति किंचित्सर्वस्मान्मो द्धतः पाहितस्मादिति प्रणयेद स्तताकृतिमस्तायां जुहोम्यग्निं
पृथिव्याममृतस्य योनौ॥ तयानंतं काममहं जयानि प्रजापतिः प्रथमो यं जिगायाऽग्नावग्निः
स्वाहेति निदध्यादादित्यमभिमुखं एवं प्रातर्व्युष्टायां तमेवाभिमुखो रात्र्या यदेन इति तु प्रण
येद तऊर्ध्वमाहिताग्निर्व्रतचार्याहोमाद नुदितहोमी चोदयाद स्तमितहोमो नित्यमाचमनमृतस
त्याभ्यां त्वापर्युक्षामीति जपित्वा पर्युक्षेत्त्रिस्त्रिरेकैकं पुनः पुनरुदकमादायानंतर्ये विकृ

ल्पो दक्षिणं त्वेव प्रथमं विज्ञायते पिता वा एषोऽग्नीनां यद्दक्षिणः पुत्रो गार्हपत्यः पौत्र आहव
नीयस्तस्माद्देवं पर्युक्षेद्गार्हपत्यादविच्छिन्नामुदकधारां हरेत्तंतुं तन्वन्रजसो भानुमन्वि
हीत्याहवनीयात्पश्चाद्गार्हपत्यस्योपविश्योदगंगारानपोहेत्सुऊतकृतस्थ सुऊतं करिष्य
थेति तेष्वग्निहोत्रमधिश्रयेदधिश्रितमध्याधिश्रितमधिश्रितं हि ३ ङ् इति॥ इळायास्पदं
घृतवच्चराचरं जातवेदो हविरिदं जुषस्व॥ ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि पु
ष्टिरस्त्विति वा न दध्यधिश्रयेदधिश्रयेदित्येके॥२॥ पयसा नित्यहोमो यवाग्वा रोदनो दधि
सर्पिर्ग्रामकामाऽन्नाद्यकामेन्द्रियकामतेजस्कामानामधिश्रितमवज्वलयेदनधिश्रयं दध्य
ग्निष्टे तेजो मा हाषीरिति स्रुवेण प्रतिषिंच्यान्न वा शांतिरस्यमृतमसीति तयोरव्यति
चारः पुनर्ज्वलता परिहरेत्त्रिरंतरितं रक्षोंतरिता अरातय इति समुदंतं कर्षन्निवोदगुद्वा

सू॰ पू॰ २

१४

14

सयेद्दिवे त्वांतरिक्षाय त्वा पृथिव्यै त्वेति निदधत्सुऊत कृत स्रुख सुऊतम का र्ये त्यंगारा नति
सृज्य स्रुक् स्रुवं प्रतितपेत्प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातय इ
त्युत्तरतः स्रुखाल्याः स्रुच मासाद्यो मुन्नयानीत्यति सर्जयीतो हिताग्निराचम्यापरेणवे
दिमति व्रज्य दक्षिणत उपविश्येत च्छुत्वो मुन्नयेत्यति सृजेदिति सृष्टो भूरिळा भुवइळा
स्वरिळा हृधइळेति स्रुवपूरमुन्नयेदग्रियमग्रियं पूर्णतमं यो नु ज्येष्ठमं उदिमिछेत्सु
त्राणां यो स्य पुत्रः प्रियः स्यात्तं प्रतिपूर्णमुन्नयेत्स्थालीमभिमृश्य समिधं स्रुचं चा
ध्यधिगार्हपत्यं हृत्वा प्राणसंमिता माहवनीय समीपे कुशेषूपसाद्यं जान्वाच्यै समिध
माधाय विद्युदसि विद्य मे पाप्मानमग्नो श्रद्दे त्यप उपस्पृश्य प्रदीप्तां द्व्यंगुलमात्रे भि
जुऊयाद्भूर्भुवः स्वरो३म ग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति पूर्वमाऊतिं ऊत्वा कुशेषु सा
समिधमादध्यादिजतां त्वाग्निज्योतिषं रात्रिमिष्टकामुपदधे स्वाहेति ३

१४

दयित्वा गार्हपत्यमवेक्षेत पशून्मे यच्छेत्य थोत्तरां तूष्णीं भूयसीमसंसृष्टां प्रागुदगुत्त
रतो वा प्रजापतिं मनसा ध्यायां तूष्णीं होमेषु सर्वत्र भूयिष्ठं संस्रुवविदिग्धं च्छित्रिरनुप्रकंप्या
वमृज्य कुशमूलेषु निमार्ष्टि पशुभ्यस्त्वेति तेषां दक्षिणतउत्तानांगुलीः करोति प्रा
चीनावीती तूष्णीं स्वधा पितृभ्य इति वा पो वनिनीय वृष्टिरसि वृश्च मे पाप्मानमृतुमृत्ये
त्यपउपस्पृश्याहितानिरनुमंत्रयेताधानमुक्तो तेनर्षिणा तेन ब्रह्मणा तया दे
वतयांगिरस्वद्ध्रुवा सीदेति समिधं ता अस्य सूददोहस इति पूर्वामाऊतिमुपोत्थायोत्त
रां काक्षेतेक्षमाणो भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैरा
ग्नेयी भिश्चाग्न आयूंषि पवस इति तिसृभिः ॥ ३ ॥ संवत्सरे संवत्सरे यवाग्वा पयसा वा
स्वयं पर्वणि जुऊयाद्द्वितिजामेक इतरं कालमंतेवासी वा स्तेच्छेदकमुदङ्कः । वृत्यक्षक्ष

स्र॰ सू॰ २

१५

यद्दपरयोर्वाऽऽत्वा युषेत्वा प्राश्नामीति प्रथमं मन्त्राद्यायत्वेत्युत्तरं तूष्णीं समिधमाधाया
ग्नयेगृहपतयेस्वाहेति गार्हपत्ये नित्योत्तरां तूष्णीं समिधमाधायाग्नयेसंवेशपतयेस्वा
हेति दक्षिणेग्नये न्नादायान्नपतये स्वाहेति वा नित्योत्तरा भक्षयित्वाऽभ्यात्ममपः स्रुचा
निनयते त्रिः सर्पदेवजनेभ्यः स्वाहेत्यथैनां कुशैः प्रक्षाल्य चतस्रः पूर्णीः प्रागुदीच्यो निर्
नयेद्दतुभ्यः स्वाहा दिग्भ्यः स्वाहा सप्तऋषिभ्यः स्वाहेतरजनेभ्यः स्वाहेति पंचमीकुशादेशे
पृथिव्याममृतं जुहोम्यग्नयेवैश्वानराय स्वाहेति षष्ठी पश्चाद्गार्हपत्यस्य प्राणममृतं जुहो
म्यमृतं प्राणे जुहोमि स्वाहेति प्रता प्यांतर्वेदि निदध्यात्सरिकु र्मिणे वा अय च्छेदग्रेणा

१५

हवनीयं परीत्य समिध आदध्यात्तिस्रस्तिस्र उदङ्मुखस्तिष्ठन्प्रथमां समंत्रामाहव
नीये दीदिहीति गार्हपत्ये दीदायेति दक्षिणे दीदिदायेत्युक्तं पर्युक्षणं ताभ्यां परिसमूहने

पूर्वेतुपर्युक्षणा देवं प्रातरूपोद्दयं व्युषित उदितेवा सत्यन्ता भ्यां त्वेति पर्युक्षण मोमुंनेष्या
मी त्यतिसर्जनं हरिणी त्वास्सूर्यज्योतिषमहरिष्टकामुपद धेस्वाहेतिसमिदाधानं भूर्भुवः स्व
रो३ म्सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति होमउन्मार्जनंच॥ ४॥ प्रवत्स्यन्नग्नीन्प्रज्वल्यांचम्या
तिक्रम्योपतिष्ठत आहवनीयं रास्यप्र मेपाहीति गार्हपत्यं नर्यप्रजां मेपाहीति दक्षिण
मथर्वपितुं मेपाहीति गार्हपत्याहवनीयावीक्षेतेमान्मे मित्रावरुणौ गृहान्गोपायतंयुवं॥
आविनष्टा नविहृतान्पूषैनानभिरक्षत्वस्माकं पुनरायनादितियथेतं प्रत्येत्य प्रदक्षिणं
परियन्नाहवनीयमुपतिष्ठते॥ मम नाम प्रथमंजातवेदः पितामाताचदधतुर्यदग्रे॥ तत्वं
बिभ्रहि पुनरामभैतोस्तवाहंनामबिभराण्यग्नइतिप्रव्रजेदनपेक्षमाणोमाप्रगामेतिसू
क्तं जपन्नारादग्निभ्योवाचंविसृजेतंसदासुगः पितुमाँअस्तुपंथाइतिपंथानमवरुह्या ॰

स्व.सू.२

१६

16

नुपस्थिताग्निश्चेत्स्वासमापद्येतेहैवसंतत्रसंतंत्वाग्नेहृदावाचामनसावाबिभर्मि॥ तिरो
मासंतंमाप्रहासीर्ज्योतिषात्वावैश्वानरेणोपतिष्ठतइतिप्रतिदिशमग्नीनुपस्थायापि
पंथामगन्महीतिप्रत्येत्यसमित्पाणिर्वाग्यतोऽग्नीन्ज्वलतःश्रुत्वाऽभिक्रम्याहवनीय
मीक्षेतविश्वदानीमाभरंतोऽनातुरेणमनसा॥ अग्नेमातेप्रतिवेशारिषाम॥ नमस्ते
अस्तुमीढुषेनमस्तउपसद्वने॥ अग्नेशुंभस्वतन्वःसंमारय्यास्मजेत्यग्निषुसमिधउप
निधायाहवनीयमुपतिष्ठते॥ ममनामतवचजातवेदोवाससीइवविवसानोचरावः॥ तेबि
भ्रद्वोरक्षसेजीवसेचयथायथंनौतन्वौजातवेदइतिततःसमिधोभ्यादध्यादाहवनी
ये॥ अग्नन्नमविश्ववेदसमस्मभ्यंवसुवित्तमं॥ अग्नेसम्राळभिद्युम्नमभिसहआ
यच्छस्वस्वाहेतिगार्हपत्येयमग्निर्गृहपतिर्गार्हपत्यःप्रजायावसुवित्तमः॥ अग्नेगृह

१६

पतेभि द्युम्नमभिसह आयच्छस्व स्वाहेति दक्षिणे यमग्निः पुरीष्यो रयिमान्पुष्टिवर्धनः ॥
अग्ने पुरीष्याभि द्युम्नमभिसह आयच्छस्व स्वाहेति गार्हपत्याहवनीयावीक्षेतेमान्मे मि
त्रावरुणौ गृहान्जुगुप्ततं युवं ॥ अविनष्टान विहृतान्पूषैनान भ्यरक्षीदस्माकं पुनरा
यनादितियथेतं प्रत्येत्यप्रोष्य भूयोदशरात्राच्चतुर्गृहीतमाज्यं जुहुयान्मनो ज्यो
तिर्जुषतामाज्यं मे विच्छिन्नं यज्ञं समिमं दधातु ॥ याइष्टाउषसो या अनिष्टास्ताः संतनो
मि हविषा घृतेन स्वाहेत्यग्निहोत्राहोमे च प्रतिहोममेके परिसमुह्योद्विहाराउपविश्य भू
र्भुवः स्वरिति वाचं विसृजेत गृहानीक्षेताप्यनाहिताग्निर्गृहामा बिभीतोपवः स्वस्त्येवोऽस्मा
सु च प्रजायध्वं मा च वो गोपतीरिषदिति प्रपद्येत गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः
सुवीरान् ॥ इरां वहन्तो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशानीति शिवं शग्मं शंयोः शंयोरिति

स्रू·पू·२
१७

17

त्रिरनुवीक्षमाणो विच्छित्तमप्यलीकं न तद्दह ज्ञपिये युर्विज्ञायते ऽभयं वो ऽभयं मेऽस्त्वित्ये
वोपतिष्ठेत प्रवसन्नप्येत्याहरहर्वेति ॥ ५ ॥ अमावास्यायामपराह्णे पिंडपितृयज्ञो द
क्षिणाग्नेरेकोल्मुकं प्राग्दक्षिणा प्रणयेद्घोरूपाणि प्रतिमुंचमाना असुराः संतः स्वधया
चरंति ॥ परापुरो निपुरो ये भरंत्यग्निष्टाल्लोकात्प्रणुदात्वस्मादिति सर्वकर्माणि तां दिशा
मुपसमाधायोभोपरिस्तीर्य दक्षिणाग्नेः प्रागुदक्प्रत्यगुदग्वैकैकशः पात्राणि सादये
च्चरुस्थालिशूर्पं स्फ्योलूखलमुसलं स्रुवं ध्रुवं कृष्णाजिनं सकृदाच्छिन्नं धर्ममेक्षणक
मंडलून्दक्षिणतोऽग्निष्ठमारुत्य चरुस्थालीं व्रीहीणां पूर्णां निर्मजेत्परिसन्नान्निद
ध्यात्कृष्णाजिन उलूखलं कृत्वेतरान्पत्न्यवहन्यादविवेचमवहतांत्सकृत्प्रक्षाल्य
दक्षिणाग्नोऽश्रपयेदर्वाजति प्रणीतात्स्फ्येन लेखामुल्लिखेदपहता असुरा रक्षांसि

१७

वेदिषदइतितामभ्युक्ष्यसकृदाच्छिन्नेरवस्तीर्यासादयेदभिघार्यस्थालीपाकमाज्यंस
पिरनुत्पूतंनवनीतंवोत्पूतंध्रुवायामाज्यंकृत्वादक्षिणतश्चांजनाभ्यंजनकशिपूप
बर्हणानिप्राचीनावीतीध्मसुपसमाधायमेक्षणेनादायावदानसंपदाजुहुयात्सोमायपि
तृमतेस्वधानमोऽग्नयेकव्यवाहनायस्वधानमइतिस्वाहाकारेणवाग्निंपूर्वंयज्ञोपवीती
मेक्षणमनुप्रहृत्यप्राचीनावीतीलेखांत्रिरुदकेनोपनयेच्छुंधंतांपितरःशुंधंतांपिताम
हाःशुंधंतांप्रपितामहाइतितस्यांपिंडान्निपृणीयात्पराचीनपाणिःपित्रेपितामहायप्र
पितामहायैतत्तेऽसौयेचत्वामन्वान्वितितस्मैतस्मैयएषांप्रेताःस्युरितिगाणगारिःप्रत्यक्ष
मितरानर्चयेत्तदर्थत्वात्सर्वेभ्यएवनिपृणीयादितितोल्वलिःक्रियागुणत्वादपिजीवात
श्चात्रिभ्यःप्रेतेभ्यएवनिपृणीयादितिगौतमःक्रियाह्यर्थकारितोपायविशेषोजीवम

तानांनपरेभ्यो नधिकारा न्नप्रत्यक्षंनजीवेभ्यो निष्टणीयान्नजीवांत र्हितेभ्योजु
हुयाज्जीवेभ्यः सर्वहुतंसर्वजीविनोनामान्यविद्वांस्तत पितामहप्रपितामहेति॥६॥
निष्टतान नुमंत्रयेतांत्र पितरोमादयध्वंयथा भागमावृषायध्वमितिसव्यावृ उदङ्।
वृत्यंयथाशक्त्यप्राणंनासित्वाऽभिपर्यावृत्यामीमदंत पितरोयथाभागमावृषायीषते
तिचरोः प्राणभक्षंभक्षयेन्नित्यंनिनयनमसावभ्यंक्ष्वासावंक्ष्वेति पिंडेष्वभ्यंजनांऽजने
